CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.13

Coll. No. 168

Title Tarkasaṃgrahadīpikā-
prakāśa

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 168 Subject: Nyāya.

Title: Tarkasaṅgrahadīpikāprakāśa

Author: Nīlakaṇṭha Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11" by 5.24" Extent: 65 foll.

Language: Sanskrit Script: Devanāgarī.

Remarks: Complete.

॥श्रीगुरुभ्यो नमः॥ ॥वंदे गुरुं शिवं सांबं दक्षिणामूर्त्तिमव्ययं॥ यद्दर्शनेन मंदोपि विंदेद्गुरुसमानतां॥१॥ प्रारि
प्सितग्रंथस्य निर्विघ्नपरिसमाप्तये समाचरितं मंगलमीश्वरनत्यात्मकं शिष्यशिक्षायै निबध्नंश्चिकीर्षितं प्रतिजा
नीते॥ विश्वेश्वरमिति॥ गिरां गुरुं॥ निखिलविद्यानामुपदेष्टारं॥ इदमपि विश्वेश्वरे विशेषणं॥ गिरं गुरुमिति पाठे
तु सरस्वतीं विद्यागुरुं च प्रणिपत्येत्यर्थो बोध्यः॥ स्वग्रंथस्येतरग्रंथैरगतार्थतां दर्शयति शिशुहितामिति॥ तर्क
संग्रहदीपिकां॥ तर्कसंग्रहार्थप्रकाशिकां॥ आचरितस्य मंगलस्य तन्निबंधनस्य च फलं दर्शयति॥ चिकीर्षि
तस्येत्यादिना॥ ननु समाप्तिं प्रति मंगलस्य कारणतास्यान्नवा नादानदावरणं युज्यते मेवन्नसंभवतीत्याशंकते॥
नन्विति॥ व्यभिचारादिति॥ अन्वयव्यतिरेकव्यभिचारज्ञानरूपप्रतिबंधकसत्वान्नियतान्वयव्यतिरेकसहचा
रनिश्चयरूपकारणसंभवेन न कारणत्वनिश्चय इत्यभिसंधिः॥ समाधानं वदति॥ अतो न व्यभिचार इत्यनेना १
न्वयः॥ विघ्नास्तु न संख्याकस्य बलवत्तरस्य वा मंगलस्य विघ्ननिरसनद्वारा समाप्तिसाधनत्वेन तादृशमंगला ग

भावान्नान्वयव्यभिचार इति भावः॥ बहिरेवेति॥ जन्मांतर एवेत्यर्थः॥ अतः कुत्रचिद्ग्रंथकर्तुर्नास्ति कृत्वेपि न क्षतिः॥
अत इति॥ तादृशमंगलस्य विघ्नध्वंसद्वारा सत्वान्न व्यतिरेकव्यभिचार इत्यर्थः॥ एवं च कारणत्वं सिध्यतीति भा
वः॥ परे तु अतः उक्तहेतुद्वयात् न व्यभिचारः नान्वयव्यतिरेकव्यभिचार इति व्याचख्युः॥ मणिकृतस्तु मंगला
स्य विघ्नध्वंस एव फलं समाप्तिस्तु स्वसामग्रीवशादेवेत्याहुः॥ एतन्मतमस्मदीयचिंतामणिव्याख्यायामनु
संधेयं॥ मंगलस्य श्रुतिबोधितकर्त्तव्यताकत्वं व्यवस्थापयितुं शंकते नन्विति॥ अनुमितश्रुतेरेवेति॥ अत्रा
यमाशयः॥ श्रुतेर्वेदबोधितकर्त्तव्यताकत्वरूपवक्ष्यमाणविधेयकोटिप्रविष्टत्वेपि तदंतर्भावेण विधेयत्वम
नुपपद्यते॥ न तु तेनुमितिपूर्वमसिद्धत्वात्॥ एतेन वह्न्यादिसाध्यकानुमितिविषयतामादाय वह्नित्वादिक
मनुमितमिति व्यवहाराभावेन श्रुतावनुमितत्वव्यवहारः कथमिति शंका निरस्ता॥ श्रुतेर्विधेयतानुपग
मेन तादृशव्यवहारे बाधकाभावात्॥ एवं कारणेप्यर्थकृतेन मंगलं कर्त्तव्यं समाप्तिकामेनेत्यनुमान

रूपप्रमाणांतरसत्वेपि न क्षतिरिति। अन्येतु स्वबोधितकर्तव्यताकत्वसंबंधेन स्मृतेर्वेदसाध्यता। अग्रिमग्रंथ
व स्यापंत्रैतात्पर्यमेवं च स्मृतेरनुमितत्वोपपत्तिरित्याहुः। अत्रैव लौकिकेति। विशिष्टमंतराचारादिप्रामाण्यमितिस्तूपर्थः।
अविगीतेति। धर्मशास्त्रनिषिद्धेत्यर्थः। विहितेति। वेदोक्तत्वज्ञानेन वेदविहितकर्मकारित्वमित्यर्थः। वेदोक्त
हिंसादिकर्तरि बौद्धेऽतिव्याप्तिवारणाय तृतीयांतं। आचारविषयत्वादिति। आचारः कृतिः तस्याः कृतस्तु नियाम
कविषयतासंबंधेन हेतुताविवादयस्येति तद्विषयत्वस्य हेतुतावच्छेदकत्वमिति भावः। यथाक्रमं हेतुविशे
षणप्रयोजनमाह। भोजनादावित्यादिना। ननु अलौकिकाविगीताचारविषयत्वस्यैव हेतुतास्तु अवि
ष्टाचारविषये तादृशहेतोरसत्वेन भ्रमचारासंभवादित्याशंकाभिप्रायत्वापरिहरति शिष्टपदमिति। भोज
नादावपि शिष्टाचारविषये हेतोरसत्वं स्फुटमेव। न कुर्यादिति। स्वर्गादिफले व्यभिचारवारणाय आचार
विषयत्वेति विधेयतया आचारविषयत्वार्थकमिति संक्षेपः॥ ॥तर्कपदस्यापि सार्थकत्वभ्रमं वारयितुं व्या २

दित्यवधारणं तर्कत्वं निवक्ति। तर्क्यंत इति। उपादानरूपसंग्रहत्वासंभवादाह संक्षेपेणेति। स्वरूपकथनं। स्वरूप
ज्ञानानुकूलः। व्यापारः। एतावता द्रव्यादिपदार्थविषयाः पदार्थतत्वावधारणं प्रयोजनं संबंधश्च प्रतिपाद्यप्रति
पादकभावः पदार्थतत्वावधारणकामोऽधिकारीति। ननु एवं ग्रंथावतारसंगत्युचितं। षष्ठीतत्पुरुषभ्रमवारण द
पादहस्तवेति। सुखबोधरूपप्रयोजनस्यावगमेपि तस्यान्यतः सिद्धत्वेन तद्ग्रंथकरणे प्रयोजनाकांक्षा
स्यतीत्याशयेनावतारयति नित्येति। तेषां व्याप्तिर्यथानां। मूले सप्त पदार्था इति। द्रव्यत्वादिरूपा ये ससोपा
धयस्तदन्यतमवंतः पदार्था इत्यर्थः। अत्र सप्तत्वमपेक्षाबुद्धिविशेषविषयत्वरूपं। एवमेवाग्रिमग्रंथस्या
पि पर्यवसानमवसेयं। ननु सामान्यधर्मज्ञानस्य विशेषजिज्ञासां प्रति हेतुत्वात् सामान्यलक्षणकथना
नंतरमेव विभागो युक्तः तथा च मूले कथमादौ विभाग इति न्यूनतां परिहरति पदस्येति। अर्थः अभिधे
यः। उक्तत्वस्यापरसंबंधाभिधाविषयत्वस्य ज्ञानेपि पदसंबंधित्वांशस्याव्यावर्तकत्वादाह अभिधेयत्वमि

तिः। लक्षणं लक्ष्यत इति शेषः। तथा च न न्यूनतेति भावः। विभागादेवा पदार्थत्वावान्तरधर्मपुरस्कारेण धर्मि
प्रतिपादनादेवा। अधिकसंख्याव्यवच्छेदार्थत्वादिति। तादृशसंख्यानिषेधसिद्धिफलकत्वादित्यर्थः। उद्देश्य
विधेयभावस्थले उद्देश्यतावच्छेदके विधेयव्याप्यत्वनियमो ऽसर्गिकमित्याशयेनाह पदार्थत्वमिति। इति
व्यवच्छेदार्थत्वादिति। एतद्रूपो योऽव्यवच्छेदो निर्णयविशेषः तदर्थकत्वादित्यर्थः। समानिन्नभिन्नत्वमिति। द्र
व्यादयो ये सप्त पदार्थाः तद्भेदकूटविशिष्टभिन्नत्वं वक्तव्यमित्यर्थः। द्रव्यादिभेदसप्तकाभाववत्त्वमिति।
द्रव्यादिभेदानां प्रत्येकं प्रसिद्धानां समानां कूटस्याप्रसत्वेन तादृशभेदसप्तकत्वावच्छिन्नाभावस्य सर्वत्रास
त्वान्न दोषः इति भावः। वस्तुतस्तु पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमित्यस्य पदार्थत्वं द्रव्यत्वादिसप्त
मोपाध्यन्यतमत्वव्याप्यमित्यर्थः। एवं च वक्ष्यमाणेषु सप्तान्यतमत्वाप्रसिद्धिशंकातत्समाधानपर २
त्वन्नखसप्तान्यतमत्वमित्यादिग्रंथस्यासत्त्वेपि न क्षतिरिति ध्येयं। एवमग्रेपि द्रष्टव्यं। एवं रीत्या द्रव्याणीत्या

बाधितमतीतविषयरासाधकत्वा [illegible]

दावपीत्यर्थः। द्रव्यमिति जात्येकवचनं। मांसकमतं दूषयितुमुपन्यस्यति नन्वित्यादिना। प्रतीतिबलादित्रा
त्यक्षिकप्रतीतिबलात्। तस्य द्रव्यत्वेऽनुमानं प्रमाणयति नीलरूपाधारतयेति समवायेन नीलरूपवत्तयेत्य
र्थः। तेन कालिकादिसंबंधेन तस्यातिप्रसक्तत्वेपि न क्षतिः। एवमग्रेपि बोध्यं। तत्रा द्रव्यत्वेपि द्रव्यमिति। अतिरिक्त
त्वं व्यवस्थापयितुं क्रमप्रद्वयोध्वंतर्भावं निराचष्टे तमस इत्यादिना। अत एवाह रूपवत्त्वादेव नवायावितिः। अंत
र्भव इत्यनुषज्यते। संबंधभेदात् प्रायेणाह। स्पर्शाभावादिति। इदं च ध्वंसप्रागभावाधिकरणेऽत्यंताभावेनां
गीकृमत इति प्राचीनमताभिप्रायेण। अन्यथा समवायावच्छिन्नस्पर्शसामान्याभावस्य दैशिकविशेषणत
यावायावनुत्पत्तिकालावच्छेदेनासत्त्वानिवारितत्वापत्तेः। वस्तुतस्तु स्पर्शवद्भिन्नत्वे दैशिकविशेषणतयात्स्य
हेतुत्वमिति ध्येयं। विषमव्याप्तं हेतुमभिप्राय समव्याप्तमाह। एतद्गतीति। सदागतिः। विजातीयक्रिया
उपसंहरतीतस्मादिति। क्रमेण नवत्वमित्यर्थः। तेजोभावरूपत्वादिति। प्रोष्ठप्रकाशकतेजोभावरूपत्वं

गीकारादित्यर्थः। अतः तमस्त्वस्यापि देशे तेजःपरमाण्वादिसत्वेन तेजस्सामान्याभावासत्वेपि न क्षतिः। अणुकादिवार
णाय प्रौढेति दिक्। घटादौ व्यभिचारवारणाय आलोकासहकृतेति। चक्षुर्ग्राह्यत्वं। चक्षुर्जन्यज्ञानीयलौकिकविष
यत्वं। तेन तमस्याकृष्टे घटादीनामुपनयमर्यादया भानेपि न क्षतिः। विशेषाभावं दृष्टांतयति। आलोकाभावव
दिति। आलोकं विना रूपवत्वेन तमोविषयकचाक्षुषत्वमोदयादाहप्रमाणानिति। कारणत्वादिति। अन्यथांध
कारस्थघटादेश्चाक्षुषत्वापत्तेरिति दिक्। ननु तमसस्तादृशतेजोभावरूपत्वे तमसि रूपवत्ताप्रतीतिः कर्मवत्ता
प्रतीतिश्च कथं अभावे रूपकर्मणोरभावादित्यत आह तत्वेति। तमसोतिरिक्तत्वे अनंतावयवतत्प्रागभावादिक
ल्पनागौरवम् अतः आवश्यकत्वाद्दृशातेजोभावरूपत्वं सिध्यतीत्यपि बोध्यं। मुक्तिसाधनीभूतपदार्थतत्वज्ञानं लक्ष
णज्ञानं विना नोपपद्यते। तस्मादाह द्रव्यत्वेति। संयोगादिजनकतावच्छेदकतया द्रव्यत्वजातिसिद्धिरिति भावः। अन्य ४
लक्षणलक्ष्यतावच्छेदकयोरभेदस्त्वत आह गुणवत्वमिति। द्रव्यसामान्यलक्षणमिति। एवं च सामान्यधर्मा क

न
थनेनानुगतो[illegible]ति भावः। दूषणत्रयरहितधर्मस्यैव लक्षणत्वस्य वक्ष्यमाणत्वात् ज्ञानं विशेषणीभूत दूषणत्र
यरहितत्वज्ञानं विना न संभवति दूषणत्रयरहितत्वज्ञानं तु विशिष्य दूषणत्रयज्ञानाधीनं अभावबुद्धिं प्रति प्रति
योगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य तंत्रत्वादित्याशयेन दूषणत्रयं प्रदर्शयति। लक्ष्यैकदेशावृत्तित्वमिति।
लक्षणतावच्छेदकत्वाभिमतसंबंधेन किंचिल्लक्ष्यावृत्तित्वमर्थः। लक्ष्यमात्रेति। मात्रपदं कृत्स्नार्थकं। संबंधविशे
षावच्छिन्नलक्ष्यवृत्तित्वसामान्याभावस्फोरकं। एकदाफलत्वमिति। नन्वात्मालक्ष्यवृत्तित्वरूपातिव्याप्तेरपि स
त्वात् संकर इति वाच्यं उक्तसंकरेपि दोषासंकरादिति दिक्। एतत्दूषणत्रयरहित इति। उक्तदूषणाभावत्रय
विशिष्ट इत्यर्थः। नन्वसाधारणधर्मो लक्षणमिति हि प्राचां तत्कथं तादृशदूषणत्रयराहित्यो धर्म इत्यत आह
ष एवेति। इत्युच्यत इति अपि युक्तेरिति शेषः। नन्वसाधारणत्वस्य लक्ष्येतरावृत्तित्वरूपतया तस्याव्यापक
धारणत्वस्याव्याप्त्यादिदोषत्रयस्त धर्मेपि सत्वात् कथं दोषत्रयरहित एवासाधारणधर्म इत्याशंकां परिजिहीर्षुः।

असाधारणत्वमन्यादृशां निर्वक्ति। लक्ष्यतावच्छेदकसमनियतत्वमिति। लक्ष्यतावच्छेदकव्यापकत्वे सति लक्ष्यताव
च्छेदकव्याप्यत्वमित्यर्थः। अव्याप्त्यसंभवयोस्तयोर्वारणाय सत्यंतं। अतिव्याप्तस्य वारणाय विशेष्यं धर्मपदं तु लक्षण
ताघटकसंबंधेन व्यापकत्वादिलाभार्थं माद्कमिति ज्ञेयं। अत्रेदं बोध्यं एते दोषा असाधारणत्वस्य विघटकाः
अतिव्याप्तौ व्याप्यत्वस्य इतरयोश्च व्यापकत्वस्य भंगात्। एतेषां दूषकताबीजं तु लक्षणेनेतरभेदसाधनेतिव्या
प्तौ व्यभिचारः इतरयोश्च भागासिद्धिस्वरूपासिद्धी इति। ननु लक्ष्यतावच्छेदकसमनियतत्वस्य लक्षणलक्षणत्वे ल
क्षणस्य व्यावृत्तिरेव प्रयोजनमिति मते व्यावर्तकस्यैव तादृशलक्षणलक्ष्यतया व्यावृत्तावतिव्याप्तिरित्याशंकां लक्षण
तन्मतानुसारेणैव निराकरोति व्यावर्तकस्यैवेति। इतरभेदानुमितिजनकस्यैवेत्यर्थः। इतरभेदविधेयकानुमिति
जनकतावच्छेदकविषयताविशेषाश्रयस्येति यावत्। एतेन व्यावहारिकस्य व्यवच्छेदः लक्षणत्वे गवादिलक्षणत्वे ५
उक्तलक्षणलक्षणस्य लक्ष्यत्व इति यावत्। लक्ष्यत्व इति पाठेप्ययमेवार्थो बोध्यः। व्यावृत्तावितिगवादीतरभेदेगो

त्वादिरूपलक्ष्यतावच्छेदकसमनियतत्वस्य अभिधेयत्वप्रमेयत्वादौ पदार्थत्वसमर्थनेयत्वस्य च सत्वेनातिव्याप्ति
वारणाय व्यावृत्तिभिन्नत्वमभिधेयत्वादिभिन्नत्वं च लक्षणलक्षणे निवेशनीयमित्यर्थः। यद्यपि व्यावृत्तेरपि व्यावहा
रिकत्वस्य वक्ष्यमाणतया तेनैव रूपेण सर्वेषां संग्रहसंभवात्। पृथगभिधानमनुचितं तथापि हेतुसाध्ययोरैक्ये हे
तुमत्तानिश्चयकाले साध्यसंशयरूपपक्षताया असत्वेन नानुमितिरिति प्राचीनमते इतरभेदस्य व्यावर्तकत्वा
भावेन तत्रातिव्याप्तिः सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षतेति सिद्धांतिमते तु व्यावृत्तेरपि व्यावर्तकत्वे
न तत्रातिव्याप्तिः। लक्षणतया तत्रापि लक्षणसंगमनस्येष्टत्वेन नातिव्याप्तिरित्यावेदयितुं पृथक्कथनमिति ध्ये
यं। ननु किमिदं नाम लक्षणलक्षणलक्ष्यतावच्छेदकं व्यावर्तकत्वं। न तावत्सामान्यतो भेदानुमापकत्वं व्यावृत्तत्वभि
धेयत्वादेरपि यत्किंचिद्द्रव्यत्वाद्यवच्छिन्नप्रतियोगिताकभेदानुमापकत्वेन लक्षणलक्षणलक्ष्यतया तत्रा
तिव्याप्तिकल्पनासंगतेः सर्वेषामपि व्यतिरेकिधर्माणां यत्किंचिद्व्यावर्तकतया साधारणघटकव्यापकत्वा
यावज्जलत्वधर्मावच्छिन्नप्रतियोगिताकभेदानुमापकत्वं॥

द्विवेयर्थ्यापाताच्चानापि विशिष्य तत्तद्धर्मावच्छिन्नेतरभेदानुमापकत्वं तथा सति गोत्वावच्छिन्नेतरभेदानुमाप
कस्य सास्नादिमत्त्वस्य गोत्वसमनियतत्वं लक्षणमिति तेषां रीत्या विशिष्य तत्तल्लक्षणस्य वक्तव्यतया गोत्वादि
रूपलक्ष्यतावच्छेदकतत्तद्धर्मसमनैयत्यस्य गोत्वावच्छिन्नेतरभेदादिरूपव्यावृत्तौ सत्त्वेनातिव्याप्तेः संभवेप्य
भिधेयत्वादावतिव्याप्त्यनवकाशतापत्तेर्दुर्वारत्वात् गोत्वादिसमनैयत्यस्य तत्रासत्त्वादिति चेन्मैवं यतः सास्ना
दिमत्त्वं पक्षीकृत्य गोत्वावच्छिन्नेतरभेदानुमापकत्वे साध्ये विशेषव्याप्त्यावन्वयदृष्टांतालाभेन पक्षधर्मस
मनियतं तत्तद्धर्मावच्छिन्नव्यावर्त्तकमिति रीत्या सामान्यमुखव्याप्ते रनुपगंतव्यतया तत्रासिद्धसाधनापसिद्धि
व्याप्यव्यावर्त्तकयोर्वाच्यत्वाभिधेयत्वयोः तत्तद्धर्मसमनैयत्यरूपप्रकृतहेतुत्वस्य हेतौ सत्त्वेन प्रकृतसाध्य।
स्य तत्तुल्यस्य वा साध्यस्यासत्त्वेन व्यभिचारः स्यादतस्तद्दोषवारणाय तत्तद्धर्मावच्छिन्नेतरभेदरूपव्यावृत्तिभि ६
न्नत्वमभिधेयत्वादिभिन्नत्वं च तादृशलक्षणे निवेशनीयमित्यभिप्रायको ग्रंथः इति न पूर्वोक्तदोषावसरः अत्र

न

भिचारस्तन्यन्नानुसंधेयः ननु लक्षणस्य व्यवहारोऽपि प्रयोजनं तेन रूपेण व्यवहर्त्तव्यत्वानां विना तद्रूपावच्छिन्नबो
धकत्वात्तद्रूपव्यवहारसंभवात् एवं च व्यावहारिकलक्षणस्यापि लक्ष्यतावच्छिन्नत्वविशेषणं न देयमित्याह व्य
वहारस्यापीति ननु व्यावृत्तावतिव्याप्तिवारणाय तद्भिन्नत्वमावश्यकं व्यावृत्तेर्व्यावहारिकत्वाभावादिति तन्मं
वारयति व्यावृत्तेरपीति अपि नाभिधेयत्वादिपरिग्रहः दृष्टांतलाभाय ननु आद्यक्षणावच्छिन्ने द्रव्ये गुणवत्त्व
स्यासत्त्वेऽपि कालांतरावच्छिन्नेतद्वत्त्वस्य त्वमक्षतमेवं च गुणाश्रयत्वं लक्षणं साधीय इत्यत आह उत्पन्नविनष्टे
तिघटादौ द्वयाः संयुक्तसंयोगजनकक्रियोत्पत्तिक्षणे व्यपांतरेतादृशसंयोगनाशिकाक्रियाजातातादृ
शद्रव्यद्वस्य पर्यंत न वीनाः पुनरसमवायिकारणस्य कार्यसहभावेन कारणताभवत्वं चोत्पन्नविनष्टं नांगीकुर्वं
तिगुणादावतिव्याप्तिवारणाय गुणसमानाधिकरणेति जातिविशेषणं सत्तामादायातिव्याप्तेर्वारणाय स
त्ताभिन्नेति द्रव्यगुणान्यतरत्वमादायातिव्याप्तेर्वारणाय जातीति समवायेन तादृशधर्मवत्त्वं तात्पर्यार्थः कंचित्

नुप्त

कालिकादिसंबंधेन तद्वत्समादाय नातिव्याप्तिरिति भावः। एवमपि उक्तविवक्षया अव्याप्तिवारणेऽपि एककार्थसमवाया
देवेति। एकस्मिन्नर्थे समवायेन सत्त्वादेव स्पर्शः। गुणानां गौरवादिति। तथा च रूपेन समवायघटितसामानाधि
करण्येनैव गुणे गुणवत्त्वाव्यवहारोपपत्तौ तत्राक्रमगुणवत्त्वकल्पनं न संभवतीति गौरवादिति भावः। सामान्यवा
निति। सामान्यवत्त्वं समवायेन बोध्यं तेन न कालिकसंबंधेन तद्वति ध्वंसे तिव्याप्तिः। गुण इति। लक्ष्यनिर्देशः। आद्यवा
दाद्यगुणवत्वजातिमान्वेति। यद्यपि लक्षणलक्ष्यतावच्छेदकयोर्भेदः तथापि लक्षणेनेतरभेदे साध्ये हेतौ साध्य
सामानाधिकरण्यनिश्चयेपि हेतुधर्मितावच्छेदकसाध्यनिश्चयस्यानियतत्वाभिप्रायेणेदमिति संक्षेपः। एवमग्रे
विशेष्यं। गुणत्वजातिसिद्धिस्तु गुणपदशक्यतावच्छेदकतयेति गुणदीधितौ महाचार्याः। नन्वेवं विभुपदशक्यताव
च्छेदकतया विभुत्वमपि जातिः सिद्ध्येदिति वाच्यं। मूर्तत्वसंकरस्य बाधकस्य सत्त्वेन तस्य जातित्वासंभवात्। जातित्वा ७
भिमतसंकरस्यैव जातित्वबाधकत्वात्। तथा चोक्तं। व्यक्तेरभेदस्तुल्यत्वं संकरो

ग्रप×१

थानवस्थितिः। रूपहानिरसंबंधो जातिबाधकसंग्रहः। व्यक्तेरभेदः व्यक्तेरैक्यं आकाशादेर्जातित्वे बाधकं। व्य
क्तेस्तुल्यत्वं अन्यूनानतिरिक्तव्यक्तिकत्वं घटत्वकलशत्वयोर्भिन्नजातित्वे संकरः परस्परात्यंताभावसमानाधिकर
णयोर्धर्मयोरेकत्र समावेशः भूतत्वमूर्तत्वादेर्जातित्वे। अनवस्था जातित्वादेर्जातित्वे। रूपहानिः स्वतो व्यावर्त
कत्वात्मकरूपस्य हानिः विशेषत्वस्य जातित्वे। असंबंधः असमवेतत्वं अभावत्वादेर्जातित्वे इति संक्षेपः॥
लघुत्वादीनां प्रामाणिकत्वेपि रूपेष्वंतर्भावो न्याय्य इति समाधत्ते लघुत्वस्येति। संयोगासमवायिकारणे संयो
गेऽतिव्याप्तिवारणाय संयोगभिन्नत्वे सतीति। संयोगासमवायिकारणद्रव्येऽतिव्याप्तिवारणाय समवायीति।
भ्रमणादेरित्यादिना रेचनस्पंदनोर्ध्वज्वलनतिर्यग्गमनानां संग्रहः। गमनेंतर्भावादिति। नन्वोत्क्षेपणादीना
मपि गमनेंतर्भावोऽस्त्विति शंकनीयं। स्वतंत्रेच्छस्य नियोगपर्यनुयोगानर्हस्य ऋषेः संमतत्वादिति भावः।
परमित्यादि। लक्षणमग्रे मूल एव स्फुटं भविष्यतीति न्यूनतेति ध्येयं। सत्तायाः द्रव्यत्वाद्यपेक्षयाऽधिकदेश

६× प्रतियोगितानुयोगितान्यतरसंबंधेन समवायाभावः॥×६

वृत्तित्वेन परत्वमेव घटादीनां न्यूनवृत्तित्वेनापरत्वमेवा द्व्यत्वादीनां तन्नातः परत्वं घटत्वादितः परत्वमिति
विवेकः समवायस्य भेदो नास्तीति। न च समवायस्यानेकत्वे गंधसमवायवति वायौ रूपवत्ताप्रतीतिः स्यादि
तिवाच्यं। रूपसमवायसत्वेपि रूपाभावेन तथाप्रतीतेरभावादिति दिक्। पृथिवीलक्षणस्य प्राथम्ये बीजमाह
तत्रेति। पृथिव्यादिषु मध्य इत्यर्थः। गंधसमवायिकारणतावच्छेदकतया पृथिवीत्वजातिसिद्धिरिति बोध्यं। नाम्ने
ति। अत्र वृत्तीयार्थोनिर्देशः संकीर्तनपदार्थप्रतिपादकशब्दोऽन्योति। तथा च वस्तुप्रतिपादकनाममात्रमुद्देशः
इति लक्षणं पर्यवस्यति। अत्र घट इति लौकिकपदेऽतिव्याप्तिवारणाय वस्तुपदं लक्षणीयवस्तुपरं। लक्षणी
यस्य पृथिव्यादेः सामान्यतः प्रतिपादके प्रमेयपदेऽतिव्याप्तिवारणाय नामपदं तस्यतावच्छेदकावच्छिन्नपरं ल
क्षणवाक्येनासमस्तत्वादतिव्याप्तिरतो मात्रपदमिति ध्येयं। अरत्रेनन्यो। परस्परविरोधेनेति। सुरभिगंधत्वस्य सु ८
रभिगंधस्यासुरभिगंधं प्रति असुरभिगंधस्य प्रतिबंधकत्वेनेत्यर्थः। प्रतीत्यनुपपत्तिरिति। अतश्चित्रगंध एवा प्र

त श्रय १

तिबध्यः स्वीकर्तव्य इति भावः। अत्र च पदं गंधस्येवेति। स्वाश्रयसमवेतत्वसंबंधेनेत्यादि। उष्णत्वं तु ऊर्जन इति न्यायेनांऽ
गीकृत्याह। किंचेति। जलत्वादिकमादायातिव्याप्तेर्वारणाय गंधसमानाधिकरणेति। सत्तावारणाय द्रव्यत्वाप
रेति। द्रव्यत्वन्यूनवृत्तीत्यर्थकं तेन द्रव्यत्वव्युदासः। गंधप्रतीतेरिति। सुरभिजलमित्यादिप्रतीतेरित्यर्थः। पृथिवीगं
श्रय धस्येवेति। स्वाश्रयसंयुक्तसंबंधेनेत्यादि। तत्र जलादौ। यथार्थतिक्ताद्वीकस्य न गंधं कते। नतु तथापीति। अनुगत ग
रूपेण लक्षणताघटकसंबंधानिवेशोपि कालाद्यावतिव्याप्तिं वारयति सर्वाधारतेति। वस्तुतस्तु समवायादी
नां समवायत्वादिनेव संसर्गतया तेनैव रूपेण तत्र संबंधस्य लक्षणघटकत्वं बोध्यं। नित्यपृथिवीत्यादि रूपल
च क्षणगतं नित्यत्वादिपरशॉति नित्यत्वमिति। प्रकारांतरेणेति। पृथिवीमित्यनुषज्यते। अत्र नित्यपृथिव्याः शरीरें
द्रियभिन्नत्वरूपविषयलक्षणाक्रांतत्वेन विषयांतर्गतत्वमिति पृथिव्याः त्रिविधत्वमत एव मूले तु नास्ति त्रिविधे
त्युक्तिः संगच्छते इति ध्येयं। केचित्तु अनित्यपृथिव्या एव त्रैविध्यं वर्णयंति। उद्देशक्रमानुसारेण त्रयमंरा

शरीरलक्षणमाह। आत्मन इति। आयतनं। अवच्छेदकं। तथा च यादृशं लक्षणं संपन्नं तादृशमाह। यदवच्छिन्न इति
सुखदुःखान्यतरसाक्षात्कारावच्छेदकमिति यावत्। अत्रांत्यावयवित्वे सतीति विशेषणं देयं। तेन पादादीनाम
वच्छेदकत्वेपि तत्र नातिव्याप्तिः। शरीरत्वं तु न जातिः पृथिवीत्वादिना संकरात्। तथेंद्रियमेन जातिरित्याशयेनाह त्वं
शब्देतरोद्भूतेति। आत्मादावतिव्याप्तिवारणाय सत्यंतं। श्रोत्रेऽतिव्याप्तिवारणाय शब्देतरेति। चक्षुरादौ विशेष
गुणस्योद्भूतरूपादेः सत्वेनाव्याप्तिवारणायोद्भूतेति। उद्भूतत्वं न जातिः शुक्लत्वादिना संकरात् न च शुक्लत्वा
दिव्याप्यैः शुक्लत्वेनानेनैवोद्भूतत्वमिति वाच्यं। चाक्षुषादावुद्भूतरूपत्वादिना कारणत्वानुपपत्तेः। किंतु शुक्ल
त्वादिव्याप्यमनुद्भूतत्वं नाना तदभावकूटवत्वमुद्भूतत्वं। तच्च संयोगादावपि तथा च शब्देतरोद्भूतगुणसं
योगमादायासंभववारणाय विशेषेति। कालादावतिव्याप्तिवारणाय विशेष्यदलं। तत्रैवातिव्याप्तिवारणा
य ज्ञानकारणेति। प्राचीनमते विषयावयवेंद्रियावयवसंयोगस्य प्रत्यक्षजनकतया तदंशेस्येंद्रियावयवस्य

नवीनमते कालादौ रूपाभाववत्यपि सन्निकर्षघटकतया कारणीभूतत्वक्संयोगाश्रयस्य कालादेश्च वार
णाय मनःपदं। न चात्मान्यत्वे सतीत्यनेनैवात्मन्यतिव्याप्तिवारणसंभवे किंमुक्तरीत्या शब्देतरत्वादिविशेषणेने
ति वाच्यं। तथा सति धर्ममनःसंयोगस्यात्ममात्रवृत्तिहेतुत्वमते तत्रातिव्याप्तेरित्यलमतिविस्तरेण। एवं चे
ति। तत्र इत्यर्थस्य शरीरादिसामान्यलक्षणत्वेनैवेत्यर्थः। नन्वगंधवत्त्वं विशेषेनैव तत्लक्षणस्य सामंजस्ये गंध
ग्राहकमत्रोचितं निवेशनं एवं च इंद्रियं गंधग्राहकमिति मूलमनुपपन्नमित्याशंकां परिजिहीर्षुः तन्मूलं
तत्प्रयोजनकथनपरतया व्याचष्टे गंधग्राहकमितीति। उत्तरत्र इंद्रियं रसग्राहकमित्यादौ शीतस्पर्श
समानाधिकरणेति। अत्र विशेषणप्रयोजनं पूर्वोक्तरीत्योह्यं। जलत्वजातिसिद्धिस्तु स्नेहजनकतावच्छेदक
तयेति ध्येयं। अन्यत्सर्वं पूर्वरीत्येति। नित्यत्वादिकं जलशरीरादिलक्षणं च गंधवत्त्वस्थाने शीतस्पर्शवत्त्वं नि
वेश्य पृथिवीनिरूपणोक्तरीत्येत्यर्थः। एवमग्रेप्यूह्यं। मूलेत्र विंधनमिति। आप एव इंधनं उद्दीपनं यस्येति तदि

त्यर्थः। भुक्तस्येति। भुक्तस्यौदनादेः परिणामः परिपाकः तत्र हेतुरित्यर्थः। आकरजमिति। आकरः खनिः तत्र जा
तमित्यर्थः। सुवर्णस्य तैजसत्वं व्यवस्थापयितुरं कृते दीपिकायां नन्विति। पार्थिवत्वसाधकं पीतत्वहेतुमुक्त्वा
तैजसत्वाभावसाधकं हेतुमाह गुरुत्वादिति। एतेन सुवर्णरूपतैजसमिति विजातीयं पीतरूपं स्वीक्रियते पीतं सु
वर्णमित्यबाधितप्रत्यक्षप्रतीतिबलात्। एवं तैजसत्वस्य निर्बाधतया पृथिवीत्वं न सिध्यतीति कस्यचित्भ्रां
तिर्निरस्ता। गुरुत्वस्याप्यत्यन्तत्वेन तथा वक्तुमशक्यत्वादिति दिक्। सुवर्णस्य पीतिमगुरुत्वांशतोऽतिरिक्त
त्वं व्यवस्थापयितुं प्रमाणमनुमानं प्रयोजकत्वशंकावारणाय कार्यकारणभावमनुकूलतर्कं च
व्यवस्थापयति। अत्यन्तानलेति। सुवर्णस्येत्यादि। अनुमानप्रयोगस्त्वित्थमवसेयः सुवर्णमपार्थिवं असति
प्रतिबंधके अत्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवं यथा पृथिवी जलम १०
ध्यस्थघृतादौ व्यभिचारवारणाय असति प्रतिबंधक इति। अग्निसंयोगासमानाधिकरणद्रवत्ववति घृ

६२

तादौ व्यभिचारवारणाय अत्यन्तानलसंयोगे सतीति। द्रवद्रव्यान्तरसिद्धाविति। अत्यन्तानलसंयोगेऽपीति मात्र
यः द्रवत्वनाशप्रतिबंधकद्रवद्रव्यान्तरसंयुक्तः अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वे स
ति गुरुत्वात् जलमध्यस्थघृतवदित्यनुमानेन तत्सिद्धिर्द्रष्टव्या। जलादिकमादायानुमानपर्यवसानं वा
रयति नैमित्तिकेति। नन्वस्य स्पर्शस्य रूपयोरुपलब्धभावेन सुवर्णस्य तैजसत्वमनुपपन्नमित्यत
आह तस्येति। प्रतिबंधादिति। दोषविधयेत्यादि। शरीरेति। तथा च घ्राणस्य विषयेंतर्भाव इति भावः। स्था
नभेदादिति। इदि घ्राणेत्यादिकोशीकः स्थानभेदादित्यर्थः। स्वमतं दर्शयति। स्पर्शस्त्विमेय इति। अस्य तप
लभ्यमानस्य आश्रयः पृथिवी न चेत्यन्वयः। वायुरूपमिति। इदमाकाशादिष्वपि स्पर्शभेदसाधनाभिप्रायेण सं
वंत्रोपलब्धिप्रसंगादिति। स्पर्शस्येत्यादि। आकाशादीनां विभुत्वादिति भावः। प्रत्यक्ष इति। बहिरिंद्रियज
न्यप्रत्यक्षविषयः। अनुद्भूतस्पर्शाश्रये त्वगिन्द्रिये व्यभिचारवारणाय प्रत्यक्षेति उपाधित्वादिति। तथा च

हेतावुपाधिव्यभिचारेण साध्यव्यभिचारोऽनुपपन्नः संभवान्नप्रत्यक्षत्वसिद्धिरिति भावः । ननु तादृशप्रत्यक्षत्वस्य
गुणादावपि सत्त्वेन तत्रोद्भूतरूपाभावेन साध्याव्यापकत्वात्कथं तस्योपाधित्वमित्यत आह पक्षेत्यादिना । त
था च पक्षधर्मावच्छिन्नसाध्यव्यापकोऽयमुपाधिरिति भावः । एवं प्रत्यक्षस्पर्शाश्रयस्याप्युद्भूतरूपाभावेन ।
प्रत्यक्षत्वानंगीकारेऽप्रत्यक्षत्वापत्तिः । तत्रोद्भूतरूपाभावादिति भावः । ननु परमाणुपुंजस्यैव घटादिरू
पत्वेनातिरिक्तावयविनोऽसत्त्वात्पृथिव्यादिचतुष्टयस्य नित्यानित्यत्वाभ्यां विभागकथनमनुपपन्नमित्या
शंकां वारयति इदानीमिति । पृथिव्यादिचतुष्टयनिरूपणानंतरमित्यर्थः । द्व्यणुकस्य नाशः इत्यस्य परमाणु
द्वयसंयोगनाशादित्यादिः । सर्वत्रेति जन्यद्रव्यसामान्यस्येत्यर्थः । सर्वत्रैकरीतिरिबोध्येतेति भावः । स्वाल्पद्रव्य
त्वादिति । स्वाल्पत्वेऽपि द्रव्यत्वादित्यर्थः । रूपादावत्र व्यभिचारवारणाय विशेष्यविशेषणं चेदमप्र ११
योजकमिति शंकां वारयितुं प्रतिकारणस्य महत्त्वस्यत्रुरावपेक्षितं तत्त्रयाणामवयवत्वं विनाऽवयवसंख्याजन्यस्यत

स्य स्वीकर्तुमशक्यत्वादिति संदेहे पक्षः यत्किंचिद्द्रव्यध्वंसस्येदानीमपि सत्त्वात् सर्वेति । नित्यद्रव्याणां ध्वंसासंभवात्का
र्येति । परमाणुनिष्ठरूपादीनां तदानीमपि सत्त्वाद्द्रव्येति । ध्वंसानां ध्वंसासंभवेन महाप्रलयेऽपि सत्त्वात् भावेति ।
तिरिक्ता शब्दगुणकमित्यनुशाहवदिति वक्ष्यते तथा कथनमाकाशेनाह एव विशेषगुण इति स्वरूपनाय । घटा
काशमेव काकाश इत्यादिव्यवहारस्योपाधिकृतत्वेनासाधकत्वादाकाशस्यानेकत्वे प्रमाणं नेत्याह नेदं इति । ए
कत्वादिति । आकाशस्येत्यादिः । नन्वेकत्वेऽपि विभुत्वमस्तु तत्राह सर्वत्रेति । सर्वं दिगवच्छेदेनेत्यर्थः । परिच्छिन्नपरिमा
णवत्त्वमिति । यदि परिच्छिन्नत्वस्यापकर्षाश्रयत्वात्मकतया परमाणोरणुतरत्वेन द्व्यणुकपरिमाणापेक्षया पर
माणुपरिमाणस्यापकृष्टत्वाभावात्परमाणुत्वव्याप्तमिदं लक्षणमित्युच्यते तदा इन्द्रियावत्त्वमिति । वस्तुतस्त
लाघवमेवोत्तरकल्पानुसरणबीजमिति ध्येयं । अतीतादिव्यवहारहेतुः काल इति । मूलेऽत्रादिनाऽनागतादिपरि
ग्रहः । अतीतत्वं वर्तमानध्वंसप्रतियोगित्वं । वर्तमानत्वमिदानींतनाद्यप्रयोगाधिकरणकालवृत्तित्वं । भविष्यत्वं च ।

वर्त्तमानप्रागभावप्रतियोगित्वं। अत्र सर्वत्र कालस्य घटकतया तादृशप्रयोगरूपातीतादिव्यवहारहेतुत्वं तस्ये
ति ध्येयं। न च तादृशव्यवहारः सूर्यपरिस्पंदादिरूपोपाधिमादायापि संभवतीति वाच्यं। अनुगतव्यवहारस्यानु
गतविषयं विनाऽसंभवेनातिरिक्तः कालः स्वीकार्य इति दिक्। सर्वाधार इति। कालिकसंबंधेनेत्यादिः। अत्र विभि
न्नकालिकयोराधाराधेयभावविरहात्तत्क्रियादेः सर्वाधारत्वं केयनावतरतीति भावः। प्राच्यादिव्यवहार
हेतुरिति मूले। आदिना प्रतीच्यादिपरिग्रहः। उदयाचलसंनिहितमूर्त्तावच्छिन्नादिक् प्राचीति व्यवहितमूर्त्ताव
च्छिन्ना च प्रतीची मेरुसंनिहितमूर्त्तावच्छिन्ना दिगुदीचीति तद्व्यवहितमूर्त्तावच्छिन्ना तु दक्षिणा। ज्ञानाधिकरण
मिति। समवायेन ज्ञानवदित्यर्थः। तत्र तयोर्मध्ये। दीपिकायां नित्यज्ञानाधिकरणमिति। न च नित्यं विज्ञानमानं
दं ब्रह्मेति श्रुत्या विरोध इति वाच्यं। आनंदपदस्य आनंदवदर्थकतया ज्ञानपदस्यापि विज्ञानवदर्थक १२
तास्वीकारेणाविरोधात्। न चानंदपदस्येव तादृशार्थकत्वमसिद्धमिति वाच्यं। अर्शआद्यजन्तत्वांगीकारेण

तादृशार्थसिद्धेः। अन्यथा नपुंसकत्वानुपपत्तेः। अत्रानंदो नारोपणमेसुखी संवृत्तोऽहमितिवत् दुःखाभाव एवोपचर्य
ते। नवीनास्तु नित्यसुखमीश्वरस्यांगीकुर्वंति। त्यक्तमधिकजल्पनेन। अरूपिद्रव्यत्वादिति। बाह्यप्रत्यक्षं प्रत्युद्भूत
रूपस्य हेतुत्वादिति भावः। आत्मसुखादिव्यतिरिक्तेति विजातीयात्ममनःसंयोगादिरूपस्य मानसप्रत्यक्षहेतो
रीश्वरेऽभावादिति भावः। प्रमाणत्वादिति। न चेदमप्रयोजकमिति वाच्यं। कार्यत्वावच्छिन्नं प्रतिकृतित्वावच्छिन्न
स्य हेतुत्वेनाप्रयोजकत्वाभावादिति दिक्। उपादानगोचरेति। यद्यपि कर्तृत्वं कृतिमत्त्वमेव संभवति तथाप्यपरो
क्षज्ञानादेः चिकीर्षादिकं प्रतिकारणत्वप्रदर्शनाय तथोक्तिरिति ध्येयं। सर्वविदिति। विद् धात्वर्थः विशेषरूपेण
ज्ञानं। लक्षणमाहेति। स्वरूपमाहेत्यर्थः। मूले जीवः प्रतिशरीरं भिन्न इति। न चावयवोपचयापचयाभ्यां तत्र
तत्तच्छरीराणां भिन्नत्वेपि जीवभेदाभावादिदमसंगतं एवं कायव्यूहस्थलेपीति वाच्यं। समानकालिक
योगजधर्मजन्यशरीरस्य भेदेन जीवभेदस्यैव विवक्षितत्वेनादोषात्। एवं चैतच्छरीरावच्छिन्नभोगवान् समानका

ज्ञिकयोगाद्यजन्यशरीरावच्छिन्नभोगावच्छिन्नं इति। तत्प्रतिशरीरं जीवभेदस्तत्त्वद्रव्यस्य तच्छरीरस्यैवेति। अन्यथा
मनुष्यत्वादीनां शरीरधर्मत्वेन तथा प्रत्ययस्यैकासंगतिरित्यभिमानः। नानुपपत्तेरिति। समवायिकारणनाशस्य
ध्वंसनाशकत्वादिति भावः। योऽहमिति। भूतकालिकदर्शनवतिवर्त्तमानकालिकस्पार्शनवत्त्वं प्रत्याय्यते तच्च नवत्ताम्
तेन संभवति वास्तुषस्पार्शनवतो भेदादिति भावः। अनुसंधानायोगादिति। अन्यथा चैत्रेणानुभूतस्य वस्तुनो मै
त्रेण स्मरणापत्तेरिति भावः। ननु सर्वशरीरावच्छेदेनात्मनि सुखादिसाक्षात्कारोपपत्तये सर्वशरीरव्यापित्व
मात्मनोऽस्तु तथापि विभुत्वांगीकारे प्रयोजनाभावः इत्याशंक्य एवं शंकते न मध्यमेति। अनित्यत्वप्रसंगेनेति। यन्
मध्यमपरिमाणं तदनित्यमिति व्याप्तेरिति भावः। कृतेति। कृतस्य यागादिना संपादितस्य धर्मादेः हानं नाशः। अकृ
तस्याभ्यागमः प्राप्तिः तत्प्रसंगादित्यर्थः। कर्तुरात्मनः उत्तरजन्मन्यसत्त्वात् अकर्तुश्च सत्त्वादिति भावः। ननु जीव २२
स्याणुत्वमेवास्तां तावता नोक्तदोषः। सूक्ष्मस्य दीपस्य सर्वगृहावच्छेदेनेवाणुरूपस्यापि जीवस्य सर्वशरीराव

च्छेदेन प्रभाप्रसरणांगीकारादिति चेन्न तथा सति कायव्यूहस्थलेऽपि सुखादिसाक्षात्कारानुपपत्तेरिति दिक्। मनस्संयो
गाद्युत्पत्तिव्याप्तिवारकेंद्रियत्वघटितमूलोक्तलक्षणापेक्षया जन्यज्ञानकारणमात्रस्पर्शरहितत्वे सतीति। एकैकं म
न इति। सर्वात्मनामेकस्य मनसः स्वीकारे एकस्य ज्ञानदशायामपरस्य तदनुपपत्तिः तस्मादणुत्वेन सकलेंद्रियैरेक
त्वि४ दासंयोगाभावादिति भावः। विभ्विति। तथा च तस्य परममहत्परिमाणवत्त्वेन पूर्वोक्तदोषानवकाश इति भाव
अभावादिति। विभुद्वयसंयोगानभ्युपगमादिति भावः। ज्ञानानुत्पत्तेरिति। भावकार्यस्यासमवायिकारणजन्य
त्वनियमादिति भावः। विभुद्वयसंयोगोऽस्त्विति। तस्य नित्यत्वेनासमवायिकारणं क्रियाद्यसत्त्वेऽपि न क्षतिरिति भावः।
मात्रपदमिति। यद्यपि चक्षुर्मनोग्राह्यत्वं च स्फुरितरासात्मत्वे चक्षुर्ग्राह्यत्वं न रूपे संभवति तथापि त्वगिंद्रि
याग्राह्यत्वे सति चक्षुर्ग्राह्यत्वं तदिति ध्येयं। गुणपदमिति। नन्वेवमपि विभागानिति संयोगेऽति व्याप्तिरिति वाच्यं
त्वगग्राह्य चक्षुर्ग्राह्य गुणविभाजकधर्मवत्त्व पर्यवसानेनादोषात्। अत एव न परमाणुरूपादावव्याप्तिरिति

नोध्यं।समुदायघेति।एवकारेणातिरिक्तचित्ररूपव्यवच्छेदः।व्याप्यवृत्तित्वेति।देशिकव्याप्यवृत्तित्वेत्यर्थः।इदमु
पलक्षणं।एकैकचित्ररूपस्थलेऽनेकरूपाणामेकैकतत्प्रागभावादिस्थलेचानेकप्रागभावादीनांकल्पनेना
नेकरूपेषुचित्रइत्याकारकप्रतीतिविषयत्वकल्पनेनलाघवमिति।रूपरहितत्वेनेति।समवायेनेत्यादिः
प्रसंगादिति।द्रव्यचाक्षुषंप्रतिसमवायेनैवरूपस्यकारणत्वादितिभावः।रूपवत्समवेतत्वस्याश्रयसमवेतत्व
संबंधेनरूपवत्त्वस्यप्रत्यक्षत्वप्रयोजकमिति।प्रत्यक्षविषयत्वप्रयोजकमस्तित्यर्थः।गौरवादिति।साक्षात्संबंधेनका
वे ४ रणत्वापेक्षयागौरवादित्यर्थः।चित्रावयवैककपालेतरद्वयघटस्यचाक्षुषत्वानुरोधेनस्वसमवायिसमवेत
समवेतत्वसंबंधेनैवरूपस्यप्रत्यक्षत्वप्रयोजकत्वमंगीकर्तव्यं।एवंचलघुरीत्याचाक्षुषानुपपत्तिरपिदृष्टव्यानुपपत्तेति।
एतेनचित्ररूपवच्चित्ररसोपिसिध्येदितिशंकानिरस्ता।द्रव्यलौकिकरासनस्याप्रसिद्धात्तदनुपपत्त्य १४
वेनचित्ररसासिद्धेरितिसंक्षेपः।रसत्वइतिरसनाग्राह्यगुणविभाजकोपाधिमत्वेतात्पर्यं।एवंगंधत्वरूपेपि।

नात्रपरामिति।चक्षुरग्राह्यत्वगिंद्रियग्राह्यगुणविभाजकोपाधिमत्त्वमितिफलितार्थः।परमाणुष्वेवपाकः
इति।परमाणुष्वेवपूर्वरूपपरावृत्यादिजनकतेजस्संयोगइत्यर्थः।एवंकारव्यवच्छेद्यंस्फुटयतिनद्व्यणुकादा
विति।आमनिक्षिप्तघटइति।घटआमनिक्षिप्तेसतिश्यामघटनाशेपरमाणुषुरूपांतरोत्पत्तावित्यन्वयः।त
त्रपरमाणुरूपेष्ववयविनिपाकानंगीकारादकारणरूपमिति।परमाणुष्वेवपाकंवदतांवैशेषिकाणा
मयमाशयः।वेगातिशयवतातेजसापरमाणूनामभिघातसंयोगेसत्यवयवेषुक्रियाजायतेततोविभागः।
ततआरंभकसंयोगनाशेततस्तस्यावयविद्रव्यविनाशः।ततःस्वतंत्रेषुपरमाणुषुरूपांतरोत्पत्तौपुनरदृष्टा
दिघटितसामग्रीवशात्परमाणुषुक्रियाविभागादिक्रमेणयथास्थितमहाअवयविपर्यंतमुत्पत्तिरिति।अव
यविन्यपिपाकंवदतांनैयायिकानांत्वयमाशयः।तेजसापरमाणूनामभिघातसंयोगेपितस्यनियमेनआरं
भकसंयोगप्रतिद्वंद्विविभागजनकक्रियाजनकत्वेमानाभावेनावयविन्यपिपाकस्वीकारउचितः।अत

एवं सोयं घट इति प्रत्यभिज्ञा संगच्छते। अनंतावयविनाशाद्युत्कल्पने गौरवं चेति। न चावयविरूपप्रतिअ
वयवरूपस्य तत्राशंशत्वाश्रयविनाशस्य च हेतुतायां व्यभिचार इति वाच्यं कार्यतावच्छेदककोटौ देआत्मनि
वेशनेन व्यभिचारवारणसंभवात्। जलादावित्यर्थ इति। यद्यपि रूपादिचतुष्टयं जलादौ वर्धितं तथापि यथा
योग्यमन्वयेतास्वयं। उद्भूतत्वमिति। उद्भूतत्वं जातिः। न च शुक्लत्वादिना सांकर्यं गुणसांकर्यं न बाधकमिति।
नवीनमतानुप्रायोयं ग्रंथ इति न दोषः। केचित्तु शुक्लत्वाद्यनुद्भूतत्वेनानातत्र द्रव्याव रूपवत्वमेवोद्भूतत्व
मित्याहुः। मूले द्वित्वादिकं सर्वत्रानित्यमेवेति हेतुभूतापेक्षाबुद्धिनाशेन द्वित्वनाशादिति भावः। परिमाणस्य
गुणविबोधकशब्दैश्चिजननमसंगतमतो दीपिकायां भावप्रधान इति। असाधारणेतीति। कालादेः साधारणत्वे
नतन्नातिव्याप्तिरिति भावः। ध्वंसतान्नावेति। स्वप्रतियोगित्वस्वसामानाधिकरण्योभयसंबंधेनाकाववत्वा १५
मितितुनिष्कर्षः। संयोगनाशक इत्यतीति। न च तथापि संयोगेऽतिव्याप्तिः तस्य प्रतियोगिविधयां नाशं प्रतिका

रणत्वादिति वाच्यं प्रतियोगितासंबंधावच्छिन्ननाशनिष्ठजन्यतानिरूपितजनकत्वविवक्षणे नादोषादिति के
चित्। परे तु संयोगनाशत्वावच्छिन्ननिरूपितसमवायसंबंधावच्छिन्नकारणत्वमिति निष्कर्षः। एतन्नाप्यस्य यथा
इकंयुलपदमित्याहुः। विभाग इति। अयमप्यव्याप्यवृत्तिरिति बोध्यं। आद्येतीति। आद्यत्वमिदं स्वसमानाधिक
रणपतनप्रतियोगिकध्वंसासमानकालिकत्वं। द्वितीयपतनादीनां प्राथमिकपतनध्वंससमानकालिक धि
त्वात्तन्निरास इति भावः। तत्र हेतौ नैमित्तिकपद हेत्वर्थः। पिंडाभावेत्याति। पिंडाभावः संयोगविशेषः। नेराहेउ
संयोगजन्य इति। आद्येः समवायिकारणं नेयाकाद्धासंयोगः निमित्तकारणं तुन्नेराहेउसंयोगः इति। एवं
शरलाकाद्यविभागे समवायिकारणं रूपविभागे निमित्तकारणं इतीयेतु पूर्वपूर्वंपरा द्वः। असम
वायिकारणं पर्वमादिः निमित्तकारणमिति विवेकः। ज्ञानाभीत्यादि। ज्ञानत्वमात्रं लक्षणं ज्ञानामीत्वबु
व्यवसायगम्यतं तु ज्ञानत्वस्य प्रमाणसिद्धतत्त्वं च नायं। घटादिघटं ज्ञानामीत्याद्यनुगताबुव्यवसायस्या

नुगतधर्मसंतानुभवत्वेन तस्य स्वीकर्तव्यतया नापद्यतेति तत्सिद्धिः। इत्थं च मूले सर्वव्यवहारहेतुरिति बु-
द्धेः स्वरूपकथनमिति भावः। संस्कारस्य त्रिविधत्वाद् भावनाख्य इति। स्मृतिस्थापामतिव्याप्तिरिति। सोयं देव-
दत्त इत्याद्याकारकप्रत्यभिज्ञायां तत्तेदंताकालवृत्तित्वरूपतत्तासंस्कारजन्यत्वस्य सत्त्वेन तत्रातिव्याप्तिरिति भा-
वः। मात्रेतीति। यद्यपि संस्कारमात्रजन्यत्वं संस्कारेतराजन्यत्वे सति संस्कारजन्यत्वं तच्च स्मृतावसंभवि तत्र संस्का-
रेतरात्मादिजन्यत्वसत्त्वात् तथापि चक्षुराद्यजन्यत्वे सति संस्कारजन्यत्वे तात्पर्यमवसेयं। मूले तद्वति तत्प्रकारा-
नुभव इति। सप्तम्यर्थः विशेष्यितमाश्रयतासंबंधेनानुभवान्वयितथा च तद्विशेष्यकतत्प्रकारकानुभवत्वं य-
थार्थानुभवस्य लक्षणं। तत्पदार्थः प्रकारः। तद्वत्त्वं प्रकारतावच्छेदकसंबंधेन ग्राह्यं तेन कालिकसंबंधेन शुक्त्या-
दौ रजतत्वसत्त्वेपि इदं रजतमिति भ्रमे नातिव्याप्तिः। न च तथापि रंगत्वेन रजतत्वेन रंगादिरजतत्वेन च रंगावगा- २६
हिनि इमे रंगरजते इत्याकारकसमूहालंबनभ्रमे तिव्याप्तिः तत्र रंगविशेष्यकरंगत्वप्रकारकत्वयोः रज-

तविशेष्यकत्वरजतत्वप्रकारकत्वयोश्च सत्त्वादिति वाच्यं तद्विशेष्यकतावच्छिन्नतत्प्रकारकत्वविशिष्टानु-
भवत्वस्य यथार्थविवक्षणेनादोषात्। तथा हि ययोर्विषयतयोर्निरूप्यनिरूपकभावस्तन्निरूपितविषयितयो-
रेवावच्छेद्यावच्छेदकभाव इति सिद्धान्तः। दर्शितभ्रमे रंगत्वप्रकारतायां रंगविशेष्यतानिरूपितत्वस्य रज-
तत्वप्रकारतायां च रजतविशेष्यतानिरूपितत्वस्य सत्त्वेन रंगविशेष्यकतावच्छिन्नरंगत्वप्रकारकत्वर-
जतविशेष्यकतावच्छिन्नरजतत्वप्रकारकत्वयोरभावान्नातिव्याप्तिरिति व्याहृतयोः अनुभवत्वं विशेषणं नि
तत्फलमनुपदं स्फुटीभविष्यति। न तु तद्वति तस्य तदधिकरणे इत्यर्थकतया घटे घटत्वमिति प्रमायाम-
व्याप्तिः। आधेयतायाः वृत्तिनियामकतया तेन संबंधेन घटरूपप्रकाराधिकरणप्रसिद्धेरिति परिष्कृतेन रूपेन तु
तु घटे घटत्वमितीति। तद्वतीत्यस्य तत्संबंधिनीत्यर्थः। एवं च घटत्वस्यापि घटसंबंधितया तादृशप्रमाया आ-
माधेयतया घटसंबंधिघटत्वविशेष्यकतावच्छिन्नघटप्रकारकत्वस्य सद्भावान्नाव्याप्तिरिति समाधत्ते

यत्रेति। यथार्थानुभव एवैतत्कारेण यथार्थस्मृतिमवच्छेदः। यथार्थत्वानमात्रस्य प्रमात्वे स्मृतिकारणस्य
प्रमाणांतरत्वापत्तेरिति। नाक्षमतिव्याप्तिः। संयोगाभावावच्छेति संयोगप्रकारकत्वसत्वादितिभावः। पदव
च्छेदेनेति। यदवच्छेदेन यत्संबंधावच्छिन्नप्रतियोगिताकयदभावः तदवच्छेदेन तेन संबंधेन तत्प्रकारका
नुभवस्य विवक्षितत्वादित्यर्थः। संयोगाभावावच्छेदेनेति। संयोगाभावावच्छेदकावच्छेदेनेत्यर्थः। संयो
गावच्छेदेन। संयोगावच्छेदकावच्छेदेन संयोगसंबंधास्येति। समवायसंबंधेन संयोगस्येत्यर्थः। अत्रेदम
प्र १ वधेयं इदमव्यावृत्ति संयोगादिप्रकारकत्वमात्रं रोधेन व्याप्यवृत्ति रजतत्वादिप्रकारकत्वमलक्षणं तु तत्
संबंधावच्छिन्नप्रतियोगिताकतदभाववान् यत्तद्विशेष्यकत्वावच्छिन्नतत्संबंधावच्छिन्नतत्प्रकारताकत्व
विशिष्टानुभवत्वं। प्रतियोगितायां प्रकारतावच्छेदकसंबंधावच्छिन्नत्वनिवेशात् पर्वतो वह्निमानिति प्र १७
मायां समवायावच्छिन्नवह्न्यभाववत्पर्वतविशेष्यकत्वसत्वेपि नातिव्याप्तिः। विशेष्यित्वप्रकारित्वयोरवच्छे

यावच्छेदकतावच्छिन्नत्वेन इमे रंगरजते इत्याकारकप्रमायां रंगत्वाद्यभाववद्रजतादिविशेष्यकत्वरंगत्वा
दिप्रकारकत्वयोः सत्वेपि नातिव्याप्तिरित्यलमतिविस्तरेण। प्रसंगादिति। स्मृतस्योपेक्षानर्हत्वं प्रसंगस्तस्मादि
त्यर्थः। सामान्यतो ज्ञातस्यैव विशेषरूपेण प्रतिपादनं संभवतीति सामान्यलक्षणं स्फुटयति प्रमायाः करा
णं प्रमाणमिति। असाधारणेतीति। दिक्कालादृष्टादेः कार्यत्वावच्छिन्नं प्रत्येव कारणत्वात् अनुभवत्वव्याप्यध
र्मावच्छिन्नप्रमावृत्तिकार्यतानिरूपितकारणत्वरूपप्रमासाधारणकारणत्वस्य तत्रासत्वान्नातिव्याप्तिः।
व्यापारवत्वेति सतीत्यस्य पिबकद्वयमतश्चक्षुःसंयोगादौ नातिव्याप्तिः। श्रोत्रमनःसंयोगः शब्दे वा व्यापारः सं
भवत्येवेति नश्रोत्रेंद्रिये करणलक्षणाव्याप्तिरिति वदंति। यद्विलंबात्प्रकृतकार्यानुत्पादस्तत्कारणत्वमसा
साधारणकारणत्वात्मकतया कालादिस्तु तादृशकारणत्वाभावान्नातिव्याप्तिः। व्यापारवत्वेन निमित्तेंद्रियसंयो
गादिकमेव करणं एतच्चलिंगपरामर्शोनुमानमिति मूलएव स्फुटीभविष्यति। अतएव ... कारेरपि स्फुटं

तच्च लिंगपरामर्श इति ग्रंथेनेति तु नव्याः॥ अधिकमस्मदीयमालिप्रकाशादनुसंधेयं॥ नियतेति नियतत्वं हि व्या
पकत्वं तच्च रासभादेर्न संभवतीति तन्नयघटकारणत्वातिप्रसक्तिरिति भावः॥ पूर्ववृत्तित्वमात्रं कत्वस्य
भिन्नत्वे पि स्वपूर्वकालवृत्तित्वमात्रस्य तत्वे मनातिप्रसंग इति भावः॥ कार्यतावच्छेदकसंबंधेन कार्याधिकरणे का
र्याव्यवहितप्राक्क्षणावच्छेदेन विद्यमानात्यंताभावप्रतियोगितानवच्छेदकतद्धर्मवत्वं तेन रूपेण कारण
त्वमिति समुदितार्थो बोध्यः कारणं स्यादिति॥ तस्य नियतपूर्ववृत्तित्वादिति भावः॥ निबंधांतरेऽन्यथासिद्धेः पं
चविधत्वेपि मणिकारमतानिश्चायेन हि त्रिविधेति॥ येन सहेत्यादि॥ येन तंतुना सहैव यस्य तंतुरूपस्य यं पटं
प्रति पूर्ववृत्तित्वमवगम्यते तं पटं प्रति तत्तंतुरूपं चान्यथासिद्धमित्यर्थः॥ अत्र सहितत्वमेककालावच्छिन्नविषयत्वं बो
ध्यं तंतुरूपस्य पटपूर्ववृत्तित्वज्ञानेनातिप्रसक्तं तंतुरूपत्वेनैव विषयतावाच्या॥ तथा च तंतुरूपमन्यथासि १८
द्धं एवं तंतुत्वस्य पूर्ववृत्तित्वमपि तंतुविषयकमेवेति तदप्यन्यथासिद्धमिति भावः॥ येनेत्यस्य स्वतंत्रान्वयव्य

तिरेकशालिनेत्यपि स्वेतस्य च स्वतंत्रान्वयव्यतिरेकशून्यस्येति विशेषणं बोध्यं तेन न तथाभूतेन तंतुत्वेन तंतो
रन्यथासिद्धिः न वा तंतुसंयोगस्य तंतुना सहान्यथासिद्धिरिति संक्षेपः॥ इतरान्वयव्यतिरेकप्रयुक्तान्वयव्य
तिरेकशालि यत्तदन्यथासिद्धमिति तु परे॥ अन्यं प्रतीति॥ आकाशत्वं हि शब्दसमवायिकारणत्वं तथा च शब्द
कारणत्वमगृहीत्वाऽऽकाशस्याऽऽकाशत्वेन घटपूर्ववृत्तित्वं गृहीतुमशक्यमित्याकाशोऽन्यथासिद्ध इत्यर्थः
अन्यत्र क्लृप्तेति॥ अपाकजस्थले गंधं प्रति क्लृप्तनियतपूर्ववृत्तिना गंधप्रागभावेनैव गंधोत्पत्तौ तथा पाक
जस्थलेऽपि तत्संभवेन रूपप्रागभावोऽन्यथासिद्ध इत्यर्थः॥ अथैवं नियतपदं व्यर्थं अनियतरासभादेः वृत्तौ॥
पान्यथासिद्धत्वेन सत्वं तेनैव वारणसंभवादिति चेन्न घटसामान्यं प्रत्यन्यथासिद्धसंभवात्॥ अन्यत्र घट
भिन्ने पटादौ क्लृप्तपूर्ववर्तिनः तंत्वादितो घटोत्पत्तिसंभवादिति भावः॥ पुनरेव माकुः लघुनियतपूर्ववर्ति
नः एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमिति केचित् एवमेवान्यथासिद्धत्वं लघुत्वं च शरीरकृतमुपस्थितिकृ

तं संबंधरूपं च तत्र प्रथममनेकद्रव्यसमवेतत्वापेक्षया महत्वे। इतीयं गंधं प्रति रूपप्रागभावापेक्षया गंधप्रा
गभावे। गंधस्य प्रतियोगिनः उपलक्षितत्वेन शीघ्रं तदुपलक्षिते। इतीयं दंडत्वं दंडरूपाद्यपेक्षया दंडादौ। स्वाश्र
यदंडसंयोगादिरूपपरंपरया गुरुत्वात् एवं चैतावतैव निर्वाहेऽन्यथासिद्धिविधा पंचधा चेति प्रपंचो
व्युत्पत्तिवैचित्र्यापनयनं च नियतपदं व्यर्थं रासभादेरन्यथासिद्धत्वेनैव व्यवहारणादिति वाच्यं यतः अन्या
थासिद्धत्वस्याननुगतस्य दुर्वचतया पत्रपत्रप्रमालिका नामन्यथासिद्धत्वव्यवहारः तत्तच्छेदकक्लृप्तं निवेशानां
यत्तु लघुनियतेत्यादिकं तु भेदप्रतियोगितावच्छेदकपरिचायकमिति च तत्रानियतानंतरासभादीनामेकेन
नियतत्वविशेषणेनैव वारणात् तत्तच्छेदकक्लृप्तनिवेशे गौरवं नियतानां तु उत्पादीनां त्वनापत्त्या तत्तच्छेदकक्लृप्त
वत्त्वनिवेशान्नाप्यमित्यन्ये संक्षिप्तिरिति। यस्मिन्समवेतमित्यर्थ इति। यद्धर्मावच्छिन्नं यद्धर्मावच्छिन्ने समवायेनो १९
त्पद्यते तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नं समवायिकारणमिति परमार्थः। कारणेन घटेनेति। स्वकार्य

कार्यं कारणेन घटेनेत्यर्थः। स्वं तंतुरूपं। पटादिकं प्रति तु रीतं तु संयोगादीनामसमवायित्ववारणाय तत्र समवायि
कारणलक्षणे तत्तद्भिन्नत्वं देयमिति दिक्। ननु तुरीयविषयतानिरूपकस्य निर्विकल्पकज्ञानस्य निरूपकतासं
बंधेन प्रकारताशून्यत्वमिव विशेष्यताशून्यत्वं संसर्गताशून्यत्वं च लक्षणं संभवति विनिगमनाविरहादित्य
तो लक्षणत्रयं प्रदर्शयति विशेष्येति। विशेष्यादिविधया विशेष्याद्यनवगाहि ज्ञानमित्यर्थः। तथा च ज्ञानत्वव्या
प्तिं विशेष्यताशून्यत्वं विशेषणताशून्यत्वं संसर्गताशून्यत्वं चेति लक्षणत्रयं पर्यवसितमिति भावः। केचित्तु
प्रकाशून्यत्वे १ ननु निष्प्रकारकत्वं प्रकारताशून्यत्वं च समानवैशिष्ट्यप्रतियोगित्वं संसर्गावच्छिन्नविषयतेति यावत् तथा च सं
सर्गानवगाहित्वं ज्ञानत्वमेव संसर्गताशून्यज्ञानत्वमेव वा लक्षणमास्तां लाघवादित्यतस्तथैव मूलार्थमाहुः विशे
ष्येति। साक्षात् विशेष्यत्वं। सिद्धांते संसर्गताया इव प्रकारताया अपि विलक्षणविषयतात्मकत्वेन निष्प्रकारकज्ञा
नत्वरूपलक्षणे गौरवानवकाशादिति दिक्। निर्विकल्पकस्यातींद्रियतया तत्र प्रत्यक्षप्रमाणासंभवादनुमा

नंप्रमाणयति गोरितीनिर्विशिष्टज्ञानत्वादिति विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वात्रानुयोजकत्वशंके
त्याभावः अनवस्थाप्रसंगादिति। सविकल्पकस्य विशिष्टबुद्धित्वेन विशेषणज्ञानजन्यत्वनियमादिति भावः। वि
शेष्यविशेषणसंबंधावगाहीति इत्येवमन्वयः। अत्रास्मत्करीत्या ज्ञानं च यद्बोध्यं मन इंद्रियेण तेन संयुज्य
ते इत्यनेनान्वयः एवमग्रेपि। आत्मप्रत्यक्षे संयुक्तः आत्मा मनसा संयुज्यते तत्र प्रत्यक्षज्ञानमुत्पद्यत इति यो
जनांतरेण। कथं श्रोत्रसंबंध इति। न च श्रोत्रस्यानुत्पत्तेन तत्समवायो दूरस्थशब्देप्यस्त्विति शंकां श्रोत्रेतिप्र
संगसंगायकर्णविवरावच्छिन्ननभोऽनुयोगिकत्वविशिष्टसमवायस्यैव प्रत्यक्षहेतुतांगीकारेणातादृशसंबं
धस्य दूरस्थशब्दे ऽभावादिति भावः। प्रथमतस्तु भेरीदंडसंयोगेन नभसि शब्द उत्पद्यते तेन शब्दाः तेभ्यः पुनः शब्दा इत्येवं
क्रमेण निखिलदिगवच्छेदेन शब्दोत्पत्तेरंगीकरणीयतया तद्देशेपि सामान्यनिर्वाहाद्यादकर्दवेति। दृष्टव्यमिति। २०
अत्रेदमवधेयं विशेषणतानां संयुक्तविशेषणतात्वादिरूपेण षड्विधत्वेपि विशेषणतात्वेनैव परिगणनादौ नौ।१

त्वषड्विधत्वहानिः। न चैवं समवायत्वेनैव संयुक्तसमवायादीनामनुगमः कुतोनुक्त इति वाच्यं स्वतंत्रेच्छस्येत्यादि
न्यायानुसरणेनादोषादिति। एतेन अभावप्रमाया विशेष्यविशेषणभावसन्निकर्षजन्यत्वप्रदर्शनेनाप्रमाणां
तरत्वं प्रत्यक्षस्याद्यतिरिक्तप्रमाणत्वं। ननु अनुपलब्धेः प्रमाणांतरत्वानंगीकारे घटोपलब्धिर्नायां तदभावप्र
सक्तापत्तिः मम मतेनु अनुपलब्ध्यात्मकप्रमाणांतराभावान्नापत्तिरिति भावः। आशंकां परिजिहीर्षुर्योग्यानुपलब्धे
रिंद्रियसहकारित्वमात्रेणैव निर्वाहे अतिरिक्तप्रमाणत्वमसंभवी स्यादित्यत्र इत्यादिना। अत्राचक्षुःसंयोगादिमद्भूत ५८
ले। तर्कस्यापादकाभावस्याथ कविपर्ययस्य प्रतियोग्यापाद्यकत्वरूपं विपर्ययेतत्कोटिपर्यवसायित्वं दर्शयति।
दर्शनाभावान्नास्तीति। तद्दर्शनाभावान्नास्तीत्यर्थः। तर्कितेत्यादि। तर्कितस्यारोपितस्य प्रतियोगिनो घटादेः स
त्वस्य सत्वप्रसक्तेर्विरोधिनी उपलब्धिः तत्प्रतियोगिकोऽभावो अनुपलब्धिः तत्सहकृतेनेत्यर्थः। विरोधित्वविशेष
णमनुपलब्धेरनाद्यार्थत्वमन्वनाय। प्रतियोगिसत्वापादनापादितोपलंभप्रतियोगिकत्वरूपयोग्यताविशि

ष्टउपलब्धीसहकृतेनेति।उपरमार्थः।आलोकसंयोगाद्यसत्वदशायांयद्यत्रघटःस्यात्तर्ह्युपलभ्येतेत्यापाद
नासंभवेनयोग्यानुपलब्ध्यभावान्नतत्रघटाभावप्रत्यक्षमितिसंक्षेपः।केचित्तुतर्कितेत्यादितर्कितंआरोपितं
यत्प्रतियोगित्वंतद्विरोधिनीयाऽनुपलब्धिःतत्सहकृतेनेत्यर्थः।एतावताप्रतियोगिसत्वरूपकारणाभावप्र
योज्यःउपलब्ध्यभावःअभावप्रत्यक्षेकारणंनतुइतरकारणविरहप्रयोज्यउपलब्ध्यभावइतिसूचितं।अत
एवांधकारेउपलंभाभावसत्वेपिनघटाभावप्रत्यक्षमित्याकूतं।ननुअभावप्रमायाइंद्रियस्यकरणत्वमनुपल
ब्धेःसहकारित्वंचत्वयाकल्पनीयं।तदपेक्षयानुपलब्धेरेवकरणत्वकल्पनंवरमित्याशंक्याभावाधिकरणग्र
हणेप्रत्यक्षेइंद्रियस्यावश्यमपेक्षणीयतयाक्लृप्तेनैवेंद्रियकरणत्वेनाभावप्रत्यक्षोपपत्तावनुपलब्धेर्विजा
तीयप्रमितिकरणत्वकल्पनमयुक्तमित्याहअधिकरणेति।ननुविशेष्यविशेषणभावाख्यःसंबंधःअतिरिक्तः २१
कल्पनीयस्त्वयेत्यतआहविशेष्यविशेषणभावइति।अत्रेदंबोध्यंप्रत्यक्षंद्विविधंलौकिकमलौकिकंचेति।

लौकिकत्वंचविषयताविशेषःलौकिकेषोढासन्निकर्षःकारणंअलौकिकेतुसामान्यलक्षणाज्ञानलक्षणायोगजध
र्मश्चेतित्रिविधप्रत्यासत्तिः।तत्रसामान्यलक्षणाधूमत्वादिरूपातज्ज्ञानरूपावासामान्यंलक्षणंस्वरूपंविषयोवाय
स्याइतिव्युत्पत्तेःसाचाश्रयाणांनिखिलधूमादीनामलौकिकप्रत्यक्षेउपयुज्यते।अतीतानागतधूमादिषुचक्षुःसं
योगादेरसंभवात्इंद्रियाणामसन्निकृष्टानांप्रत्यक्षाजनकत्वात्।ज्ञानलक्षणातुसुरभिचंदनमितिचाक्षु
षोपनीतज्ञानेसौरभेणचक्षुषोयोग्यसन्निकर्षासंभवात्एवंयोगिनांदेशकालविप्रकृष्टपदार्थप्रत्यक्षे
योगजधर्मःप्रत्यासत्तिरितिसंक्षेपः॥ ॥इतितर्कसंग्रहदीपिकाप्रकाशेभगवदर्पितेप्रत्यक्षपरिच्छेदः॥ ॥
॥छ॥अनुमानंलक्षयतीति।प्रत्यक्षोपजीवकत्वसंगत्यानुमानंनिरूपयतीत्यर्थः।परामर्शेति।तथाचप्र
त्यक्षप्रमित्यपेक्षयानुमितेर्विलक्षणप्रमितित्वेनानुमानस्यप्रमाणांतरंसिध्यतीतिभावः।विपरीतज्ञानो
त्तरप्रत्यक्षंप्रतिविशेषदर्शनस्यहेतुत्वमंगीकुर्वतांमतमवलंब्याशंकतेनन्विति।छा।स्थाणुपुरुषसंशयेति।इदंवि

रूपाभावरूपकोटिकसंशयांगीकारेणपरेत्वाहुरुक्तरूपेतिश्लाघ्यत्वतदभावप्रकारकत्वतद्भावकोटिकमित्यर्थः
त्वाकृतरूपएवेतिनिर्णयस्तत्वनाथातत्रसंशयोत्तरप्रत्यक्षस्थले। अनुव्यवसायविरोधादिति। इदमुपलक्षणं।
उक्तरूपमनुमितोऽनुव्यवसायाभावेनप्रमाणाभावादित्यपिद्रष्टव्यं। संशयोत्तरप्रत्यक्षेजननीयेवक्ष्यमाणपक्षता
यःपरामर्शसहकारित्वेप्रयोजनाभावेनपक्षतासहकृतपरामर्शजन्यत्वविवक्षणेनातिव्याप्तिरित्याह। पक्षते
तिएतेनवह्निव्याप्यधूमवत्पर्वतवानयमितिविशिष्टवैशिष्ट्यावगाहिबुद्धिंप्रतिविशेषणतावच्छेदकप्रकारक
निर्णयविधयावह्निव्याप्यधूमवान्पर्वतइतिपरामर्शस्यकारणत्वेपिनतत्रातिव्याप्तिःपक्षतासहकृतपरामर्श
जन्यत्वस्यासत्वेनातिव्याप्तेरभावादितिसंक्षेपः। यद्यपिसाध्यसंशयस्यपक्षतात्वेपिसाध्यनिश्चयकालेऽनुमि
तिवारणंसंभवतितथापिघनगर्जनेनमेघानुमितौव्यभिचारःअतोऽन्यादृशींपक्षतामाहसिसाधयिषेति। सि २२
साधयिषायाःसाध्यानुमितिच्छायाःस्वप्रकाशेनयोऽभावःतद्रूपसमवायितत्वपक्षघटितसामानाधिकरण्य

संबंधेनतद्विशिष्टायाःसिद्धेःसमवायेनाभावइत्यर्थः। साध्यसिद्धिःपक्षतावच्छेदकविशिष्टेसाध्यतावच्छेदकवि
शिष्टसाध्यवैशिष्ट्यावगाहिनिश्चयःसिद्धेऽपिसिसाधयिषाविरहवैशिष्ट्यनिवेशनस्यप्रयोजनंदर्शयतिसिद्धिस
त्वेपीति। अत्रसिद्धिश्चपर्वतोवह्निमान्वह्निव्याप्यधूमवांश्चेतिसमूहालंबनरूपाऽतःपरामर्शसंपत्तिरितिध्ये
यं। व्याप्तिविशिष्टपक्षधर्मताज्ञानमित्यत्रव्याप्तिविशिष्टेपक्षधर्मताव्याप्तिविशिष्टपक्षधर्मतातज्ज्ञानमितिस
प्तमीतत्पुरुषांगीकारेव्यभिचारिलिंगकानुमितौव्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वाभावेनाव्याप्तिरतो
व्याप्तिविशिष्टपदस्यव्याप्तिविषयकेतथाभवखंज्ञानमितिपदेनकर्मधारयमंगीकरोतिव्याप्तिविषयकामि
तिव्याप्यवच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयःपरामर्शइतितुनिर्ग
लितार्थः। अत्रविनीय। आभिलापकस्याहमुखार्थ। नियतसामानाधिकरण्यंसाध्याभाववदवृत्तित्वादिरूपंनसं
भवति। इदंचासंभवेपत्वादिसाधारण्यात्। साध्याभावाद्यप्रसिद्धेरित्यालोच्याहहेतुसमानाधिकरणेति। वह्नि

मान्धूमादित्यादौ धूमसमानाधिकरणो योत्यंताभावः घटात्यंताभावः तत्प्रतियोगिवह्निः तत्सामानाधिकर
ण्यं धूमेऽस्तीति लक्षणसमन्वयः धूमवान्वह्नेरित्यादौ तु धूमसामान्याभावस्यापि हेतुसमानाधिकरणतया
तत्प्रतियोग्येव धूम इति नातिव्याप्तिः न च वह्निमान्धूमादित्यादौ तत्तद्वह्न्यभावस्य कालीनीन्यायेन धूमसमा
नाधिकरणतया तादृशाभावप्रतियोगित्वं न कस्यापि वह्नेरित्यव्याप्तिरिति वाच्यं अत्र प्रतियोगिसाध्ये त्यस्य
प्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नेत्यर्थे तात्पर्यकतया दोषात् प्रतियोगितायां साध्यतावच्छेद
कसंबंधावच्छिन्नत्वं निवेशनीयं तेन वह्निमान्धूमादित्यादौ समवायेन वह्नित्वावच्छिन्नप्रतियोगिताकाभावस्य
धूमसमानाधिकरणत्वेन क्षतिः हेतुपदं हेतुतावच्छेदकावच्छिन्नपरं अतः द्रव्यं विशिष्टसत्तादित्यादौ विशिष्ट अ॰ ३
स्य शुद्धानतिरेकितया हेत्वधिकरणगुणादिनिष्ठत्वेपि द्रव्यत्वाभावस्य नाव्याप्तिः हेत्वधिकरणता हेतुता २३
वच्छेदकसंबंधावच्छिन्ना ग्राह्या तेन वह्निमान्धूमादित्यादौ वह्निसामान्याभावस्य धूमसमवायिनिष्ठत्वेपि

नाव्याप्तिः न चैवमपि संयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः साध्यस्य हेतुसमानाधिकरणाभावप्रतियोगिताव
च्छेदकावच्छिन्नत्वादिति वाच्यं हेतुसमानाधिकरणाभावे प्रतियोगिव्यधिकरणत्वस्य निवेशनीयत्वात् केवला
न्वयिसाध्यके तादृशाभावस्य घटाभावादेः प्रसिद्धत्वान्नाव्याप्तिरिति । अधिकमस्मदीयमणिदीधितिव्याख्यायां बुद्धि
मद्भिरनुसंधेयं । स्वार्थानुमितिमिति । स्वस्यार्थः प्रयोजनं साध्यसंशयनिवृत्तिरूपं यस्या इति व्युत्पत्त्या स्वीयसं
शयनिवृत्तिप्रयोजनकानुमितिमित्यर्थः । परप्राप्तिः एकसंबंधिज्ञानमपरसंबंधिस्मारकमिति रीत्या दर्शनस्य स्मृ
तिहेतुत्वादिति भावः कथं व्याप्तिग्रह इतीति । व्यभिचारज्ञानदशायां न कस्यचिदपि व्याप्तिनिश्चयमनुपेतीति भू
योदर्शनस्य व्याप्तिनिश्चयहेतुत्वं न संभवतीति भावः । इदमुपलक्षणं भूयोदर्शनमित्यस्य सत्रूपकाणां दर्शनानां समा
हार इति त्रयं साध्यहेतूनां दर्शनमिति त्रयस्त्वधिकरणेषु दर्शनमिति वार्थः । नाद्यः एकत्रैव सहचारदर्शन
धारया व्याप्तिनिश्चयप्रसंगात् न द्वितीयतृतीयौ एतद्रूपवानेतद्रसादित्यादौ साध्यहेत्वोरधिकरणेत्रयसत्वा ।

भावेन व्याप्तिनिश्चयानुत्पादप्रसंगादित्यपि बोध्यं। मणिकारसिद्धांतमवलंब्याह व्यभिचारतानवच्छेदेति। व्याप्तिग्राहक
त्वादिति। व्याप्तिश्च हेतुसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसमा
नाधिकरणवृत्तिहेतुतावच्छेदकरूपेण सामानाधिकरण्यं। तस्य तास्म्यादिसाधारण्यात् धूमत्वादेः स्वरूपतो व्या
प्यतावच्छेदकत्वं तादृशधूमत्वत्वादिरूपेण च व्याप्तित्वमित्यवच्छेद्यावच्छेदकयोरैक्येपि न क्षतिः। इत्थं च साध्यता
वच्छेदकेन तथाविधप्रतियोगितानवच्छेदकत्वांशस्य हेतु साध्यतावच्छेदकेन तथाविधप्रतियोगितावच्छेदकत्वरूप
व्यभिचारस्य हानाभावो विपरीतग्रहाभावविधया हेतुः साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकांशस्य हेतुविशेष
णज्ञानविधया सामानाधिकरण्यज्ञानं वृत्तिहेतुरितिरीत्या व्यभिचारज्ञानाभावसामानाधिकरण्यज्ञानयोर्व्या
प्तिग्रहहेतुतेति ध्येयं। वस्तुतस्तु हेतुव्यापकसाध्यसामानाधिकरण्यमेव व्याप्तिः। न चाव्याप्यासमसाधारणे २४
नभ्रमात्मकासन्नलिंगकपरामर्शात् तत्र भ्रमात्मकवह्न्यनुमित्यापत्तिः भ्रमात्मकपरामर्शस्यात्र भ्रमत्वं मितिजनक

त्वनियमसत्त्वेनेष्टापत्तेरयोगादिति वाच्यं यद्धर्मावच्छिन्नव्यापकत्वं व्याप्तिघटकं तद्धर्मधर्मितावच्छेदकव्याप्ति
प्रकारकनिश्चयस्यैवानुमितिहेतुत्वोपगमेनादोषात्। अत एव व्याप्तिशरीरे धूमत्वत्वाद्युपवेशो न्यायवन्नि
तिदिक्। शंकां चेति। व्यभिचारसंशयस्यापि व्याप्तिग्रहप्रतिबंधकत्वानुभवात् साधारण्यव्यभिचारज्ञान
त्वावच्छिन्नाभावो हेतुरिति हृदयं। तद्विरहः व्यभिचारशंकाविरहः। क्वचिदिति। तर्कभिन्नेतरनिखिलकार
णसमवधानस्थले इत्यर्थः। क्वचित्त्वतस्मिन्नेवेति। इतरकारणविरहस्थले तादृशकारणविरहप्रयुक्त ए
वेत्यर्थः। तथा च तत्र तर्कापेक्षा नेति भावः। धूमाग्न्यादेरिति। धूमाग्न्योर्व्याप्तिग्रहे तत्संशयमाने व्यभिचारशंका
निवर्तककार्यकारणभावभंगप्रसंगलक्षणस्तर्क इत्यन्वयः। स च तर्कः धूमो यदि वह्निव्यभिचारी स्यात्तत
र्हि वह्निजन्यो न स्यादित्याकारको बोध्यः। ननु महानसीयवह्निधूमयोः सन्निकृष्टत्वेन सहचारग्रहेप्यन्ये
षां वह्निधूमानामसन्निकर्षेण सहचारप्रसक्त्यासंभवेन निखिलधूमेषु व्याप्तिप्रसक्त्यसंभवति तथा च

पर्वतीयधूमदर्शनेनव्याप्तिस्मरणासंभवात्परामर्शानुपपत्तिरित्याशयेनशंकतेनन्विति।सकलेति।सकलवह्नि
धूमेषुलौकिकसन्निकर्षाभावेपिसामान्यप्रत्यासत्त्यात्मकालौकिकसन्निकर्षसद्भावात्वह्नित्वावछिन्नस
मानाधिकरण्यत्वेननिखिलवह्निधूमसहचारप्रत्यक्षसंभवान्निखिलधूमेषुव्याप्तिग्रहःसंभवतिएवंचप
र्वतीयधूमेपिव्याप्तेर्गृहीतत्वेनधूमदर्शनेनस्मरणसंभवात्परामर्शानुपपत्तिरितिसमाधत्तेवह्नित्वधूम
त्वेति।यद्यपिपरार्थानुमानशब्दस्यपरस्यमध्यस्थस्यस्वार्थःप्रयोजनंसाध्यानुमितिरूपंयस्मादितिव्युत्प
त्त्यापरसमवेतानुमितिकारणलिंगपरामर्शोर्थःअतएवस्वार्थानुमितिपरार्थानुमित्योर्लिंगपरामर्शएव
कारणमित्याद्यग्रिममूलंसाधुसंगछतेतथापिपरार्थानुमानप्रयोजकेपंचावयववाक्येपरार्थानुमानशा
ब्दस्योपचारिकप्रयोगइति।परार्थानुमानयस्मात्तत्परार्थानुमानमितिवामनसिकृत्यमूलमवतारयति। २५
परार्थानुमानमाहेति।पंचावयववाक्यमित्यनेनपंचस्वरूपावयवस्यवाक्यस्येतिव्युत्पत्त्याप्रतिज्ञादिवाक्यपंच

वा१

कसमुदायत्वंन्यायलक्षणंबोध्यंअनेनप्रतिपादितात्लिंगादितिसूत्रस्यप्रतिज्ञादिपंचकसमुदायप्रयोज्यलिंग
परामर्शादित्यर्थः।साध्यवत्तयापक्षवचनमिति।साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकपक्षतावच्छेदकाव
च्छिन्नपक्षविशेष्यकबोधजनकवाक्यमित्यर्थः।उदाहरणात्साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञा
नंपक्षतावच्छेदकविशिष्टेउपनयाच्चपक्षतावच्छेदकविशिष्टेनसाध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानमितित
योर्निरासः।वाक्यपदस्यन्यायावयववाक्यपरत्वान्न्यायबहिर्भूतवाक्यव्युदासः।एवमग्रेपि।अत्रपंचम्यंतंहेतुसं
योगाजन्यद्रव्यत्वादित्यादौप्रज्ञार्थपंचम्यंतत्वसत्त्वादतिव्याप्तेर्वारणायलिंगप्रतिपादकमिति।हेतुप्रतिपाद
कवाक्यमित्यर्थः।व्याप्तिप्रतिपादकमिति।प्रकृतहेतुमितिप्रकृतहेतुव्यापकत्वविशिष्टसाध्यबोधकवा
क्यमित्यर्थः।कथमुदाहरणस्यव्यापकत्वबोधकत्वमितिचेदित्थंसाध्यपदस्यहेतुव्यापकत्वविशिष्टसाध्ये
निरूढलक्षणया।नचाधिकपदस्यवैयर्थ्यमितिवाच्यंतादृशतात्पर्यग्राहकतयासार्थक्यात्।अथवा

दूं

प्रथमपक्षपरार्थमहानसे द्वितीयपक्षपरार्थे च महानसान्यस्मिन् प्रकृतहेतुमत्त्वस्य तत्परार्थे तस्मिन् साध्यस्य च
सत्त्व इव बोधे जाते उत्तरकालं व्यापकताबोधो मानसः तथा च व्याप्तिप्रतिपन्निपरत्वमुदाहरणस्यानुगतमिति नक
श्चिद्दोषगंध इति दिक्। व्याप्तिविशिष्टलिंगप्रतिपादकमिति पक्षतावच्छेदकविशिष्टविशेष्यकप्रकृतसा
ध्यव्याप्यहेतुप्रकारकबोधजनकवाक्यमित्यर्थः। पक्षधर्मताज्ञानार्थं तु पुनः प्रतिपादेन तु प्रयुज्यत इति शेष ग
इत्यनेन प्रदर्शितार्थ एव यथा कथंचित्संगमनीयः हेतुसाध्यवत्तया पक्षवचनमिति हेतुत्वा। तज्ज्ञाप्यतावि
ह शिष्टसाध्यत्वसाध्यवद्विषयकबोधजनकवाक्यमित्यर्थः। उत्तरकालमबाधितासत्प्रतिपक्षितत्वे तु विषय
कबोधोपानसीयः इष्टव्यः। न तु विशिष्टवैशिष्ट्यावगाहिपरामर्शस्यानुमितिप्रति हेतुत्वेन तत्रान्यथासिद्धत्वनि
यतपूर्ववृत्तित्वयोर्द्वयोः कल्पनीयतया गौरवं वह्निव्याप्यो धूमो धूमवांश्चायमिति ज्ञानद्वयस्य तु मते विशि २६
ष्टपरामर्शं प्रति कारणत्वेन क्लृप्तस्य कारणत्वहेतुश्च नन्यथासिद्धत्वमात्रस्य कल्पनीयतया लाघवमिति

प्राचां शंकते नन्विति। वह्निव्याप्यवानयमिति। व्याप्तत्वदन्यमतकरणस्यासत्त्वेन व्यभिचारात् ज्ञानद्वयस्या
कारणत्वे संभवतीति भावः। कथंचिदपि व्याप्यतावच्छेदकधूमत्वादेर्ज्ञानं परामर्शेन संभवतीति स्फोरण
यज्ञाद्दिति। लाघवेनेति। कल्पनालाघवेनेत्यर्थः। तथाहि ज्ञानद्वयेऽनन्यथासिद्धत्वनियतपूर्ववृत्तित्वयोः क
ल्पनापेक्षया विशिष्टपरामर्शेति कल्पनस्यैव लघीयस्त्वमिति। वस्तुतस्तु तद्धर्मावच्छिन्नविशेष्यकव्याप्ति
प्रकारकनिश्चयविशिष्टतद्धर्मावच्छिन्नप्रकारकपक्षतावच्छेदकावच्छिन्नविशेष्यकनिश्चयत्वस्यैव कार
णतावच्छेदकत्वं ज्ञानद्वयसाधारण्यानुरोधेन तेन मतं प्राचीननैयायिकमते तु व्याप्तिविशिष्टवैशिष्ट्यावगा
हिनिश्चयत्वं कारणतावच्छेदकमिति कारणतावच्छेदकलाघवमेव ध्येयं। विनिगमनाविरहेणाह यथा
न लिंगत्वेनापि कारणत्वं चरमाचार्याणां मतं निरस्यति लिंगमकरणमिति। व्यभिचारादिति। तत्रापि अनु
मितेरनुत्पन्नसिद्धत्वेन तद्व्यवहितपूर्वं वृत्तत्व विष्यत्धूमादेरसत्त्वादिति भावः मत इति। फलायोगव्यवच्छि

न्त्कारणं करणमिति मते तु परामर्श एव करणमिति ध्येयं। करणेति व्याप्तिवारणाय तज्जन्यत्वे सतीति। यद्यपि
अनुमाननिरूपणस्य व्युत्पत्तिज्ञातत्वेन तद्विभाग एवोचितः तथापि लिंगस्य त्रैविध्ये प्रदर्शिते तज्ज्ञानस्य त्रैविध्यं
फलतीति मनसि कृत्वा हेतुलिंगं विभजते। अन्वयेन व्यतिरेकेण च व्याप्तिमदिति मूलस्य। अन्वयसहचारदृ
ष्टान्तव्याप्तिमत्त्वे सति व्यतिरेकसहचारदृष्टान्तव्याप्तिमदित्यर्थं मनसि कृत्य तादृशव्याप्तिद्वयं प्रकाश
यति हेतुसाध्ययोरिति। अन्वयमात्रव्याप्तिकत्वरूपं केवलान्वयित्वलक्षणे मात्रपदेन व्यतिरेकव्याप्तेर्व्यवच्छे
दात्तयाप्तिद्वासिद्धिभ्यां व्याघात इत्याशंक्य प्रकारान्तरेण परिष्करोति। केवलान्वयिसाध्यकमिति। केवलान्व
यिसाध्यकव्यतिरेकिहेतोः संग्रहाय साध्ये केवलान्वयित्वं निवेशितं तदेव निर्वक्ति अत्यन्ताभावेति। निरवच्छि
न्नवृत्तिमदत्यन्ताभाव इत्यर्थः। तेन गगनाभाववत् संयोगाभावादिसाध्यकहेतोः संग्रहः। घटपदाद्यभिधेयत्वस्य २७
पदाद्यवृत्तित्वेन सर्वत्र सत्त्वासंभवादाह सर्वपदाभिधेयत्वमिति। मूले व्यतिरेकमात्रव्याप्तिकमिति। निश्चितव्य

तिरेकव्याप्तिमात्रकमित्यर्थः। तेन पृथिवी इतरेभ्यो भिद्यते गंधवत्त्वादित्यादौ अन्वयव्याप्तेः सत्त्वेपि न लक्षणासंगतिः
। इतरभेदः पृथिवीतरत्वावच्छिन्नप्रतियोगिताकभेदः। अन्वयित्वमिति। अन्वयसहचारदृष्टान्तव्याप्तिमत्त्वमि
त्यर्थः। तथा च प्रसिद्धानुमानमिवेतरद्व्यन्वयव्यतिरेक्येव स्यादिति भावः। असाधारणमिति। सपक्षव्यावृत्तत्व
रूपासाधारण्यलक्षणाक्रान्तत्वादिति भावः। अप्रसिद्धसाध्यकेपि साध्यविशेषणकानुमितिरेव स्यादित्यभिप्रायेणाह
साध्येत्यादि। व्यतिरेकव्याप्तीति। साध्याभावव्यापकाभावप्रतियोगित्वरूपेत्यर्थः। पृथिवीतरसामान्यभेदेन सा
ध्यते अपि जलादिभेदकूटः साध्यते तथा च नोक्तदोष इत्यत आह जलादीनामिति। जलादीनां ये त्रयोदशान्यो
न्याभावास्तेषां कूटः साध्यत इत्यर्थः। समुदायस्य प्रसिध्यसंभवादाह प्रत्येकमिति। त्रयोदशत्वावच्छिन्नेति। अनु
मितेः पूर्वं निश्चितसाध्यतावच्छेदकावच्छिन्नवत्तया पक्षमिलन एवाप्रसिध्या तत्र हेतोः सत्त्वासत्त्वनिबंधनेन्वयित्वा
साधारण्ये इति समुदितार्थः। प्रत्येकं प्रसिद्धावपेक्षाबुद्धिविशेषविषयत्वरूपसमुदायत्वविशिष्टज्ञानं संभव

ति। तथा च विशेषणतावच्छेदकप्रकारकनिश्चयस्य सत्त्वात् साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाह्यनुमि
तिः व्यतिरेकव्याप्तिज्ञानं च संभवतीत्याह। पक्षे साध्याधिकरणे वा इत्यादि। यद्यपि जलादिचतुर्दशान्योन्याभावानां
चतुर्दशसु प्रत्येकमिति रीत्या व्यतिरेकानुमितिं तथापि त्र्यर्थापत्तेः प्रमाणांतरत्वमंगीकर्तव्यं तत्प्रकारकस्माद्धेतुं व्य
तिरेकेण व्याप्तेरनुमितिं गमयत्वस्य प्रदर्शनीयतया तन्मतसाधारण्येन व्यतिरेकव्याप्तिं प्रदर्शयितुं जलादिव्य
योऽश्वोत्पत्तिकथनं न स्तन्मते जलादिचतुर्दशान्योन्याभावप्रसिद्धः अन्यथा साध्याधिकरणानामत्वकसत्वेनानं
गीकारादिति ध्येयं। केचित्तु जलमेवादिर्येषां त्रयोदशानामिति विग्रहेण जलादिप्रतियोगिकानां चतुर्दशाना
मन्योन्याभावानामित्यर्थः। त्रयोदशान्त्विति। जलादीत्यादिः। उक्तविग्रहेण चतुर्दशानामित्यर्थः। अग्रेप्येवं बोध्यमि
त्याहुः। मूले संदिग्धसाध्यवानिति। विशेष्यतासंबंधेन साध्यप्रकारकसंशयविशिष्ट इत्यर्थः। सपक्षलक्ष २८
णादिकमप्येवं परिष्कर्तव्यं। पक्षलक्षणस्याव्याप्तिमाशंक्य तेदीपिकायां नन्विति। संशयविघटकत्वाद्धेत्विसिद्धि

लेऽव्याप्तिमुक्त्वा पक्षलक्षणे पिता माह। किं चेति। उक्तेति। सिषाधयिषाविरहविशिष्टसिद्ध्यभाववत्त्वपक्षताश्र
यत्वस्य पक्षलक्षणत्वादित्यर्थः। स्वहेतुं निरूप्येति। व्याप्त्यादिविशिष्टहेतुं निरूप्येत्यर्थः। सद्धेतुनिरूपणे सद्धेतोः
स्मरणात् प्रसंगसंगत्या तन्निरूपणमिति भावः। मूले हेत्वाभासा इति। हेतुवदाभासंत इति हेत्वाभासाः दुष्ट
हेतवो निरूप्यंत इत्यर्थः। ननु साध्यधर्मप्रकारकत्वानपेक्षतया विशेषणजिज्ञासानुदयेन सव्यभिचारत्वादि
नाविभागोऽनुचित इत्याशंकामपनिनुत्सुर्दोषलक्षणे। सिद्धे तद्दोषवत्त्वरूपदुष्टलक्षणस्यातिस्फुटत्वाद्धे
तोर्नवात्त्वस्युद्दशयेन दोषसामान्यलक्षणमाह। अनुमितीति। हेत्वाभासत्वमिति। हेतोराभासा हेत्वाभासाः हेतु
निष्ठा दोषास्तेषां भावस्तत्त्वमित्यर्थः। ह्रदो वह्निमानित्याद्यनुमितिप्रतिबंधकाभाववान् ह्रद इत्यादिबाधनिश्चय
स्य प्रतिबंधकतया प्रमात्मकत्वादज्ञाननिश्चयविषयत्वं वह्न्यभाववद्ध्रदादावक्षतमिति लक्षणसमन्वयः।
तत्रानुमितिपदमजहत्स्वार्थलक्षणयाऽनुमितितत्करणान्यतरपरं। तेन व्यभिचारादिरहितानस्य परामर्शप्रतिबं

धकतयैव निर्वाहादनुमित्यप्रतिबंधकत्वेपि व्यभिचारादिज्ञानाव्याप्तिः पर्वतो निर्वह्निरिति बाधभ्रमस्य पर्वतो
वह्निमानित्यनुमितिविंधकत्वात्तद्विषयकवह्न्यभावाद्यवतित्व्याप्तिरतो यथार्थेति। भ्रमभिन्नेत्यर्थः। अत एव
मपि वह्न्यभाववद्ध्रदात्मकबाधैकदेशेव वह्न्यभावाद्यवतित्व्याप्तिः। वह्न्यभाववान्ह्रद इत्याकारकयथार्थज्ञा
नविषयत्वस्य तत्र सत्वादिति चेन्न यद्रूपावच्छिन्नविषयकज्ञानसामान्यमनुमितिप्रतिबंधकं तद्रूपाव
च्छिन्नत्वं दोषत्वमित्यर्थपर्यवसानेनादोषात् वह्न्यभाववत्वावच्छिन्नविषयकज्ञानसामान्यमनुमितिप्र
तिबंधकं तद्रूपावच्छिन्नत्वं दोषत्वमित्यर्थपर्यवसानेनादोषात् वह्न्यभाववत्वावच्छिन्नविषयकस्य वह्न्यभा
ववान्ह्रद इति ज्ञानस्यानुमितिप्रतिबंधकत्वेपि तद्दृशज्ञानसामान्यांतर्गतस्य वह्न्यभाव इत्याकारकज्ञानस्या
प्रतिबंधकत्वेन वह्न्यभाववत्वादेर्यत्पदेनोपादानासंभवात् न च तद्धि यथार्थपदस्यार्थपर्वतो निर्वह्निरिति भ्र २९
मविषयेपि वह्न्यभावाद्यवतित्व्याप्तेरुक्तरीत्यैव वारणसंभवादिति वाच्यं ज्ञानपदस्य ज्ञानविशेषतात्पर्यका

हकतया यथार्थपदसार्थक्यात् एवं च यद्रूपावच्छिन्नविषयकानाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयसामान्यं
प्रकृतानुमितिप्रतिबंधकं तद्रूपावच्छिन्नत्वं दोषत्वमित्यर्थः। पर्यवसितः तेन वह्न्यभाववद्ध्रदविषयकस्याहार्यस्या
प्रामाण्यज्ञानविशिष्टज्ञानस्य संग्रहः पक्षस्यानुमित्यप्रतिबंधकत्वेपि नासंभव इत्यलं पल्लवितेन। परे तु इदं तु स
नामेव लक्षणं यत्तु ज्ञायमानव्यभिचारादेः प्रतिबंधकत्वमनुपेत्य तद्घटितानुमितिप्रतिबंधकायेव्यभि
चारादयः एकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्वसंबंधेन तत्प्रकारकयथार्थज्ञानविशेष्यत्वं धूमवान्वह्नेः
रित्यादौ धूमाभाववद्ध्रदत्वविशिष्टपक्षवह्निव्यभिचारः। उक्तसंबंधेन तद्वान्वह्निरित्याकारकयथार्थज्ञानविशेष्य
त्वमस्तीति लक्षणसमन्वयः। अनुमितिपदस्य प्रकृतानुमितिपरतया सद्धेतावनुमितिप्रतिबंधकीभूतव्यभिचा
रादीनामप्रसिद्धत्वान्नातिव्याप्तिः। यथार्थपदस्य नाहाने दर्शितसंबंधेन व्यभिचारप्रकारकभ्रमज्ञानविशेष्यत्वस्य
सद्धेतावपि सत्वेनातिव्याप्तिः स्यादिति तन्निवेशः इत्याहुः। स च त्रिविध इतीति। सामान्यलक्षणं तु साधारणासाधारणान्यतमत्वं

स्फुटं। मूले तत्रेति। साधारण्यादिरूपध्यापादृत्त्यर्थः। साध्याभाववद्वृत्तिरिति। साध्यतावच्छेदकं धर्मसंबंधावच्छिन्नप्रतियो
गिताकाभाववदवृत्तित्वरूपितहेतुतावच्छेदकसंबंधावच्छिन्नाधेयताभाववानित्यर्थः। तेन वह्निमान् धूमादित्यादौ हेतुमति
पर्वतादौ तत्र साध्याभावस्य संबंधांतरावच्छिन्नसामान्याभावस्य च सत्वेपि साध्याभाववति धूमावयवादौ सम
वायादिना धूमस्य वृत्तित्वेपि च नातिव्याप्तिः। अत्र च साध्याभाववत्तायां संबंधविशेषावच्छिन्नत्वानिवेशे वह्निमा
न्धूमादित्यादौ वह्न्यभावस्य कालिकादिसंबंधेन पर्वतादौ वृत्तेरतिव्याप्तिः दैशिकविशेषणताविशेषावच्छिन्नत्व
निवेशे घटत्वाभावादित्याध्यकव्यभिचारिणि साध्याभावस्य घटत्वादेर्विशेषणताविशेषेणाधिकरणाप्रसि
द्ध्याव्याप्तिरतः साध्यतावच्छेदकसंबंधेन साध्यवत्ताग्रहं प्रति येन संबंधेन साध्याभाववत्तानिश्चयः प्रतिबंधक
स्तेन संबंधेन साध्याभाववत्वं विवक्षणीयं वह्न्यादौ साध्यतादृशसंबंधो दैशिकविशेषणता। घटत्वाभावादौ च सा ३०
ध्ये समवायस्तथैति न दोषः। कपिसंयोगी एतद्वृक्षत्वादित्यादौ तादृशसंबंधो निरवच्छिन्नदैशिकविशेषणतेति

दिक्। न च विरुद्धेऽतिव्याप्तिरिति। ज्ञापितव्यं। उपधेयसंकरेप्युपाधेरसंकरादिन्यायेन तस्य विरुद्धसाधारण्येपि कृताति
विरहात्। सर्वसपक्षव्यावृत्त इति सपक्षवृत्तित्वतावच्छिन्नाभाववानित्यर्थः। सर्वपदं सपक्षवृत्तित्वसामान्याभाव
निवेशस्फोरकं सपक्षपदं निश्चितसाध्यवदर्थकं। शब्दो नित्यत्वसाधकशब्दत्वादित्यादौ तावपि पक्षे साध्यसंदेहदशा
यामसाधारण्यस्यैव त्वादिति संप्रदायविदः। नवीनास्तु पक्षे तावपि पक्षे साध्यसंदेहदशायामसाधारण्ये दशायामा स्प
परा ५ साधारण्यस्य च कृते मन्वाकालिकविरुद्धपरामर्शदशायां सत्प्रतिपक्षस्य च स्वीकारे बाधभ्रमदशायां बाधस्यापं
गीकारापत्तेः न हि दिवस्येप्युक्तिप्रत्यपामः एवं चात्र सपक्षपदं केवलसाध्यवत्परं। शब्दो नित्यः शब्दत्वादित्यादिसाध्यव
द्वृत्तिहेतोरेव लक्ष्यतेति न कोपि दोष इति प्राहुः। अन्वयव्यतिरेकदृष्टांतरहित इति। तत्वं च किंचिद्विशेष्यकनि
श्चयाविषयसाध्यकत्वे सति किंचिद्विशेष्यकनिश्चयाविषयसाध्याभावकत्वं। नदिनमते तु अस्तंताभावाप्रतियो
गित्वविशिष्टसाध्यादिकमेवानुपसंहारित्वं तज्ज्ञानस्य व्यतिरेकव्याप्तिग्रहप्रतिबंधकता। साध्याभावव्याप्य इति।

साध्याभाववद्व्याप्तिः साध्यवदवृत्तित्वं च साधारण्यस्य तु निश्चितसाध्यवदवृत्तित्वरूपतया नाभेदः । नवीनमते तु साध्या
भावव्यतिरेकव्याप्तिः साध्यव्यापकाभावप्रतियोगित्वरूपेति नासाधारण्याभेदः । एतादृशव्याप्तिविशिष्टहेतुमत्ता
ज्ञानं साध्याभावहेतुमितिप्रतिबंधकमिति ध्येयं । पक्षस्य साध्याभाववत्त्वादि । यत्संबंधि यत्साध्यं तदभावव्याप्यहेत्वंतरस्य ज्ञा
नं पक्षेऽस्ति स सत्प्रतिपक्ष इत्यर्थः । प्रकृतसाध्यव्याप्यत्वेन ज्ञायमानो यः प्रकृतहेतुस्ततोऽन्यस्मिन् हेतौ साध्याभावव्या
प्यत्वज्ञानदशायामेव तस्य सत्प्रतिपक्षितेति प्रकृतेति मूलं चाप्रहेत्वंतरेतीति प्राञ्चः । नवीनास्तु नैवं वर्णयंति पक्षसंबंधि साध्या
भावव्याप्यहेत्वंतरस्य पक्षे सत्त्वं सत्प्रतिपक्ष इत्यर्थ इति । आश्रयासिद्ध्युपधेयेति । आश्रयासिद्धिश्च पक्षे पक्षतावच्छेदक
विरहः पक्षतावच्छेदकविरहवान् पक्षो वा । स च नास्त्येवेति । अरविंदस्य प्रसिद्धत्वात् तद्विशेषणीभूतान्याश्रयेनारविंदे ग
गनीयत्वं नास्तीति पर्यवसितोर्थः । स्वरूपासिद्धिश्च पक्षे हेत्वभावः हेत्वभाववान् पक्षो वा । ननु सोपाधिकस्यातिरिक्तस्य सत्त्वा २१
त्कथं पंचहेत्वाभासा इत्यत आह सोपाधिक इति । व्याप्यत्वासिद्धिः व्याप्यत्वाभावः तस्याः सोपाधिकहेतोर्नियमेन सत्त्वा

त्सोपाधिको व्याप्यत्वासिद्ध एव न त्वतिरिक्तो हेत्वाभास इति भावः । उपाधेर्दूषकत्वमस्मन्नवीनदीपिकायां व्यक्तीभविष्य
त्यग्रे । अत्रेदमवधेयं साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः पा
षाणं च नभय वह्निमान् काञ्चनधूमादित्यादौ तद्ग्रहदशायां हेतुतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टव्याप्ति
ग्रहप्रतिबंधकफलं तयोर्व्याप्यत्वासिद्धावेवान्तर्भावान्न हेत्वाभासाधिक्यमिति । साध्यव्यापकत्व इति । साध्यव्यापक
त्वसाधनाव्यापकत्वे एकरूपेणैकरूपेणैकसंबंधेन च ग्राह्ये तेन वह्निमान् धूमादित्यादौ तत्तद्वह्नेर्वह्नित्वेन सा
ध्यव्यापकत्वस्य तत्तद्वह्नित्वेन च साधनाव्यापकत्वस्य सत्त्वेऽपि आलोकसंयोगेन साध्यव्यापकत्वस्य समवायेन
च साधनाव्यापकस्य सत्त्वेऽपि च नातिव्याप्तिः । मूले सोपाधिलक्षणस्याव्याप्तिं वारयितुं लक्षणान्तरं प्रदर्शयति ।
उपाधिश्चतुर्विध इति । यद्धर्मविशिष्टसाध्यव्यापकत्वं तद्धर्मविशिष्टसाधनाव्यापकत्वं लक्षणे निवेशनीयम् अन्यथा
पर्वतत्वात्मकपक्षधर्मविशिष्टवह्निव्यापकस्य कस्यचित्किंचिद्धर्मतावच्छिन्नाव्यापकत्वादित्यव्याप्तिः स्यादि

तिद्धेयं। उदासीनेति। पक्षधर्मसाधनाभ्यां भिन्नेत्यर्थः। वह्निर्द्रव्यत्वं आत्मा न द्रव्यत्वं इदं केवलप्रत्यक्षत्वस्यैव साध्यत्वा
द्यसारेणागन्तव्यो विनाशी जन्यत्वादिति। अत्र जन्यत्वं पक्षधर्मो न भवतीति साधनावच्छिन्नसाध्यव्यापकत्वघटित
लक्षणं। अनित्यत्वव्यापकमिति। विनाशित्वव्यापकमित्यर्थः। जन्यत्वस्योदासीनत्वं संपादयितुं प्रमेयत्वादिति। बाधस्य
साध्याभाववत्तानिश्चयस्याप्याभावनिश्चयत्वेनेति। अनुमितिप्रतिबंधकत्वमित्यनेनान्वयि। विरोधिज्ञानसाम
ग्रीत्वेनेति। इदं प्राचीनमते। वस्तुतस्तु विरोधिपरामर्शस्य साध्याभावव्याप्यवत्तानिश्चयत्वेनैव प्रतिबंधकत्वं बाध
वात्। इतरेषां व्यभिचारादिग्रहाणां। तत्रापि। व्यभिचारादिग्रहेष्वपि साधारणस्येति। भावप्रधाननिर्देशात् यासा था
ण्यस्येत्यर्थः। अव्यभिचाराभाववत्याद्ग्रहस्येति शेषः। व्याप्तिज्ञानप्रतिबंधकत्वमित्यनेनान्वयः। एवमग्रेपि हेतौ
साध्याभाववद्वृत्तित्वस्यैव साध्यतावच्छेदके हेतुसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचा ३२
रत्वात् तद्ग्रहस्य हेतुसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकताभावरूपयोः व्यभिचारः तद्ग्रहप्रतिबंध

कत्वेतिभावः। हेतौ साध्याभाववद्वृत्तित्वप्रकारकग्रहस्य व्याप्तिग्रहप्रतिबंधकत्वं तु मणिकारादिन्यायेन विशिष्टव्याप्त्यभा
वतया हेतुव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्याभावरूपतया। व्याप्तिसंशयाधायक
त्वेनेति। हेतावसाधारण्यादिज्ञानदशायां हेतुसाध्ययोः सामानाधिकरण्याभावरूपतया व्याप्तिसंशयाधायकत्वेने
ति। हेतावसाधारण्यादिज्ञानदशायां हेतुसाध्ययोः सामानाधिकरण्यनिश्चयासंभवेन पक्षांतर्भावेन च साध्यसंश
यसत्वेन व्याप्तिसंशयसंभवात् व्याप्तिनिश्चय इति प्राचीनमतमभिप्रेत्येदं। पक्षधर्मताज्ञानप्रतिबंधकत्वमि
ति पक्षे पक्षतावच्छेदकविरहस्य हेतुविरहस्य च निश्चयदशायां हेतौ पक्षतावच्छेदकविशिष्टपक्षवृत्तित्वग्रहा
संभवादिति भावः। ननु पंचलौकिकसंगतादिहेतावुपाधिग्रहदशायामपि व्याप्तिनिश्चयासंभवेनोपाधिज्ञान
स्य व्याप्तिनिश्चयप्रतिबंधकतायाः अवश्यं वक्तव्यतयोपाधेरपि हेत्वाभासलक्षणाक्रांतत्वादत आह उपाधि
स्त्विति व्यभिचारज्ञानद्वारेति। तथा च हेत्वाभासलक्षणे साक्षादनुमितितत्करणान्यतरप्रतिबंधकत्वस्यैव निवेश

नीयतया परमुखत्वेनिरीक्षकस्योपाधेर्न हेत्वाभासत्वमितिभावः नन्तु तथापि सिद्धिसत्त्वेऽनुमित्यनुदयात्तद्विषय
स्यसाध्यवत्पक्षस्यापि हेत्वाभासत्वमावश्यकमित्याशंक्यांतरं नैयायिकमतवखंड्योपस्यापरिहरति सिद्धसा
धनंत्विति। पक्षताविघटकतयेति मन्मते पक्षतायाः साध्यसंशयरूपतया तद्विघटकत्वं साध्यनिश्चयस्याक्षतमि
तिभावः अंतर्भवतीति। तथा च न विभागव्याघात इति भावः। दर्शितमतमतिशिथिलमित्याशयेनोच्याहन्निय हेति
न च सिद्धं तेऽनुमितिप्रतिप्रतिसिद्धेः प्रतिबंधकतया तद्विषयस्य कथं हेत्वाभासतेति वाच्यं सिषाधयिषाया
सिद्धिनिष्ठप्रतिबंधकतायामुत्तेजकतया केवलसिषाधयिषासहितसिद्धेः प्रतिबंधकत्वाभावेन तद्विषयेऽस्य हे
त्वाभासलक्षणासंस्पर्शादिति। अधिकमस्मदीयासिनवरीक्षितिव्याख्यायां तर्ककर्कशाविचारचातुरीधुरीणैर
नुसंधेयं॥ इति तर्कसंग्रहदीपिकाप्रकाशे नगवदर्पिते ऽनुमानपरिच्छेदः॥ ॥छ॥ ॥श्रीगणेशाय नमः॥ ॥ ३२
उपमानं लक्षयतीति। अवसरसंगत्या उपमानं निरूपयतीत्यर्थः। उपमितिस्वरूपं कुसादयति मूले संज्ञेति। सं

ज्ञा गवयपदं। संज्ञी गवयः तयोः संबंधः शक्तिः तज्ज्ञानमित्यर्थः। उपलक्षणं तूपमिनोमीत्यनुव्यवसायगम्योपमितित्व
मेवेति ध्येयं। वाक्यार्थस्मरणं गोसदृशं पिंडं पश्यतीति एतेन स्मरणं सादृश्यदर्शनजन्यमुद्बोधकांतरजन्यं वाऽत्र
यमपि सादृश्यदर्शनस्य सहकारित्वं तु सादृश्यदर्शनजन्यमेव स्मरणं सहकारीति सूचितं प्राचस्तु वाक्यार्थस्मरन्नि
त्यत्र वर्तमानसामीप्ये प्रत्ययः वाक्यार्थं स्मरिष्यन्नित्यर्थः। एवं च वाक्यार्थस्मरणस्य सादृश्यदर्शनजन्यतालाभेनव्या
पारतालाभ इत्याकूतः। तदनंतरमित्यादि। सादृश्यदर्शनानंतरं गवयो गवयपदवाच्य इत्याकारिका गवयत्वरूपलघु
धर्मधर्मितावच्छेदिकोपमितिरुत्पद्यत इत्यर्थः। इदमुपलक्षणं वैधर्म्यदर्शनेनाप्युपमितिरिति ध्येयं। वैशेषि
कास्तु पदवाच्यत्वव्याप्यसादृश्यादिपरामर्शात्पदवाच्यत्वस्यानुमितिरेवातो नोपमानं प्रमाणांतरमित्याहुः तन्न
संख्यातिज्ञानमंतरापि पदवाच्यत्वप्रमितेरनुभवसिद्धत्वादित्यन्यत्र विस्तरः॥ ॥इति तर्कसंग्रहदीपिकाप्रकाशे
नगवदर्पिते उपमानपरिच्छेदः॥ ॥छ॥ ॥शाब्दं लक्षयतीति। उपजीव्योपजीवकभावसंगत्या शाब्दं निरूपयतीत्य

र्थः अत्र तोपमानशाब्दस्य शाब्दप्रमाणतया शाब्दे उपमानोपजीवकत्वाभावादुपमितिशाब्दबोधरूपफलयोः संग
तिर्बोध्या तथाहि शक्तिपरिच्छित्तिरेवोपमितिः तस्याश्च शाब्दबोधोपजीव्यत्वेन फलयोरुपजीव्योपजीवकत्वसंभ
वात् तादृशसंगतेश्च फलनिष्ठत्वेपि स्वाश्रयकरणत्वात्मकपरंपरासंबंधेन करणनिष्ठत्वात् करणयोरनंतराभिधा
नप्रयोजकत्वं। शाब्दज्ञानस्य प्रमाणत्वांगीकर्तॄन् विनमनेनोपमितेः शक्तपदविषयकत्वेन शाब्दप्रमाणतयात
च्चोपमानजन्यत्वस्याहृततया तत्फलयोरपि संगतिरिति मंतव्यं। मूले आप्तवाक्यं शब्द इति शब्द इति लक्षणनिर्दे
शः प्रमाणशब्द इति तदर्थः। आप्तवाक्यमिति लक्षणं। नवतिद्विपयसासिंचतीत्यादिशाब्दः आप्तोक्तवाक्यं न तु वह्नि
ना सिंचतीत्यादिशब्दः तदुच्चारणकर्त्तुर्यथार्थवक्तृत्वरूपाप्तत्वाभावात् प्रकृतवाक्यार्थगोचरयथार्थज्ञानजन्य
वाक्यं प्रमाणशब्द इति तु निष्कर्षः वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वात् लक्षणसंगतिः स्फुटमेतच्छब्दमणौ मी ३४
मांसमतनिरासकत्वेनाग्रिमग्रंथमवतारयितुं तन्मतसाधारण्येन शक्तिपदार्थमाह अर्थस्मृत्यनुकूलेति। शा

ब्दबोधजनकार्थस्मृत्यनुकूलो घटादिपदघटादिरूपार्थयोः संबंधः शक्तिरित्यर्थः। अनुकूलत्वमिह प्रयोजकत्वं तच्च
कारणतावच्छेदकेपरपदार्थसंबंधेप्यक्षतं। घटादिपदतदर्थयोरन्यसंबंधवारणायानुकूलांतं विवक्षितार्थकं अन्य
संबंधज्ञानस्यार्थस्मृतिजनकत्वेपि शाब्दबोधजनकस्मृतिजनकत्वाभावात्। अर्थस्मृत्यनुकूलत्वस्यादृष्टादिसा
धारण्यादिविशिष्यमिति ध्येयं पदार्थांतरमिति। तत्तत्पदार्थतावच्छेदकाभाववत्त्वादित्यर्थः। तेनातिरिक्तपदार्थत्व
स्य तन्मते प्रसिद्धत्वेपि न व्याघातः। अस्मात्पदादयमित्यादिमूलस्य एतत्पदजन्यबोधविषयोऽयमर्थ इत्याकारके
श्वरेच्छा शक्तिरित्यर्थः। ननु पदार्थांतरमिति। न चेश्वरीयज्ञानस्येच्छायाः कृतेर्वा शक्तिरूपत्वे विनिगमनाविरहा
दतिरिक्तैव शक्तिरिति वाच्यं। आधुनिकसंकेतस्येच्छारूपतया शक्तेरपीच्छारूपत्वे संकेतज्ञानस्यानुगतका
रणत्वात् संभवति नान्यथेत्येवं विनिगमकसंभवेनेच्छाया एव शक्तित्वस्वीकारात् न च भगवदिच्छायाः सक
लविषयिण्याः शक्तित्वस्वीकारे घटपदबोध्यत्वप्रकारकतदिच्छायाः पटेपि सत्त्वात् घटपदवाच्यत्वस्या

तिप्रसंगः एवं गंगापदजन्यबोधविषयत्वप्रकारकेच्छायाः तीरेपि सत्वेन शक्त्यैव तद्बोधसंभवे लक्षणोच्छेदापत्तिरि
ति वाच्यं यतः तत्तत्पदवाच्यत्वं तत्तत्पदजन्यबोधविषयत्वप्रकारतानिरूपितेश्वरेच्छीयविशेष्यतावत्त्वं तादृशप्रका
रतानिरूपितविशेष्यतासंबंधेन तदिच्छावत्त्वं वा तथा च तादृशघटपदवाच्यत्वस्य पटेऽसत्त्वान्नातिप्रसंगः। गंगादिप
दजन्यत्वस्य बोधांशे बोधविषयत्वस्य च तीरांशे सत्त्वात् तेन ज्ञानमीश्वरेच्छायामुपेयते इत्थं च विशेषकलितज्ञानलक्ष
णे निरूप्यनिरूपकभावापन्नविषयताया भावेन गंगादिपदजन्यत्वप्रकारतानिरूपितबोधविषयतानिरूपि
तविषयत्वप्रकारतानिरूपितविशेष्यतासंबंधेनेच्छावत्त्वस्य तीरेऽसत्त्वेन न क्षतिरिति संक्षेपः। विशिष्टे शक्तिं व्यव
स्थापयितुं मीमांसकमतमुपन्यस्य दूषयति गवादीत्यादिना विशेषणतया जातिग्रहं विना विशिष्टग्रहाऽसंभवे
न विशिष्टे शक्तिकल्पनं न संभवति अतः जातिग्रहस्य प्रथममपेक्षितत्वेन जातावेव शक्तिकल्पनमुचितं लाघवादित्या ३५
ह विशेषणतयेति। प्रथममुपस्थितत्वादिति। विशिष्टग्रहात्पूर्वमेवगतत्वादित्यर्थः कथं तर्हि व्यक्तिभानम् इत्यत आह।

व्यक्तीति। आक्षेपादिति। अर्थापत्तिप्रमाणादित्यर्थः व्यक्तावेव संभवेनेति अनुपपत्तिप्रतिसंधानस्य न्यतादृशापाम
पि व्यक्तिज्ञानस्यानुभवसिद्धत्वेन न चेत्यपि बोध्यं विशिष्टव्यक्तावेवेति। एवकारेण केवलजातिशक्तिकल्पनाव्यवच्छेदः
अत्रेदं बोध्यं जातिविशिष्टतदाश्रयेषु त्रिषु शक्तिः कल्पनीया पदार्थद्वयसंबंधस्यैव पदद्वयसमभिव्याहारलभ्य
त्वादिति। नव्यास्तु उक्तसत्तावच्छेदकत्वग्रहमात्रेण जन्यतावच्छेदकस्य यथा शाब्दबोधे भानं तथा शक्यतावच्छेदक
त्वग्रहमात्रेण शक्यतावच्छेदकस्य शाब्दबोधे भानं संभवतीति शक्यतावच्छेदके च शक्तिर्न कल्पनीयेति वदंति शक्ति
ग्रहश्च वृद्धव्यवहारेणेति। शक्तिग्रहो वृद्धव्यवहारादिना भवतीत्यर्थः। तेन व्याकरणादिपरिग्रहः अत एव श
क्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धाः
इत्यभियुक्तोक्तिः संगच्छते। व्याकरणात् प्रकृतिप्रत्ययादीनां शक्तिग्रहः। उपमानाच्छक्तिग्रहस्त्वधस्ताद्दर्शितः
अथैकदंतहेरंबलंबोदरगजाननाः इति कोशादेकदंतादिशब्दानां गणेशत्वविशिष्टे शक्तिः इत्यर्थकान् गणेशत्ववि

शिष्टे शक्तिग्रहः। तत्र एकं तादृशानामेव पदार्थतावच्छेदकानां तेषां विभिन्नत्वेन कंबोपपत्तिः कोकिलः पि
कवाच्य इत्याप्तवाक्यात् पिकपदस्य कोकिले शक्तिग्रहः व्यवहारतः शक्तिग्रहमुपपादयति। व्युत्पित्सुरिति। श
क्तिग्रहेच्छावानित्यर्थः। उत्तमवृद्धेति। प्रयोजकवृद्धेत्यर्थः। मध्यमवृद्धस्येति। प्रयोज्यवृद्धस्येत्यर्थः। गवान
यनं दृष्ट्वा प्रवृत्तिमुपलभ्य चेत्यन्वयः। उपलभ्येत्यस्यानुमायेत्यर्थः। इयं क्रिया प्रयत्नपूर्विका विलक्षणक्रिया
त्वात्। स्वीयक्रियावदित्यनुमानप्रयोगो बोध्यः। प्रवृत्तिजनकज्ञानस्य घटानयनगोचरप्रयत्नजनकघटानयन
ज्ञानेस्य वाक्यस्य विशिष्टेर्थे शक्तिर्न कल्पनीया। तादृशार्थस्य समभिव्याहारलभ्यत्वात्। अनन्यलभ्यो हि शब्दा
र्थ इति न्यायादित्यभिसंधिमानाह अश्वमानयेत्यादि। आवापोद्वापाभ्यामिति। आवापः संग्रहः उद्वापः त्यागः। स्युत
घ्रत इति व्युत्पत्त्या अन्वयो भवतीत्यर्थः। वाक्यशेषाद्यथा यवमयश्चरुर्भवतीत्यत्र यवशब्दस्य आर्यव्यवहाराद्दीर्घशू ३६
कविशिष्टस्य वाचकः। म्लेच्छव्यवहारात् कंगोर्वाचको वेति संदेहे वसंते सर्वसस्यानां जायते पत्रशातनं। मोदमा

नाश्च तिष्ठंति यवाः कणिशशालिन इति वाक्यशेषाद्दीर्घशूकविशिष्टे शक्तिनिर्णयः कंगौ तु शक्तिभ्रमात् प्रयोगः। विवर
णाद्यथा पचति पाकं करोतीति यत्नार्थककरोतिनाख्यातव्याख्यानादाख्यातस्य यत्नविशिष्टे शक्तिग्रहः। सि
द्धपदसान्निध्याच्छक्तिग्रहस्तु विकसितपद्म इत्यादावग्रिमग्रंथ एव स्फुटीभविष्यतीत्यलं पल्लवितेन। अवच्छेद
कांतरस्य कार्यपरत्वादिति योजना। कार्यपरत्वं च कृतिसाध्यानयनादिरूपक्रियातात्पर्यकत्वं व्युत्पत्तिः शक्तिग्र
हमवच्छेद्यं स्फुटयति न सिद्धेति। सिद्धेपि व्यवहारादिति। तथा च सिद्धेपि शक्तिग्रहस्त्वावश्यकः अन्यथा तत्रानुभव
सिद्धस्य शाब्दबोधस्यापलापापत्तेरिति भावः। तीरेपि शक्तिर्न कल्प्यत इति। गंगापदस्येति शेषः। नन्वेवं सैंधवा
दिपदानां नानार्थकतानुपपत्तिः एकत्र शक्तिरन्यत्र लक्षणेत्येवं रीत्यैव निर्वाहादत आह सैंधवादाविति। आदि
नाहर्यादिपरिग्रहः संबंधाभावादिति संयोगादिरूपसंबंधाभावादित्यर्थः। इदमुपलक्षणं प्रसिद्धयोरर्थयोः।
कुत्र शक्तिः कुत्र लक्षणेत्यत्र विनिगमकाभावेनोभयत्र शक्तिकल्पनस्यावश्यकतेति मंचा इति मंचपदं मंचकं ल

पुरुषेत्यादौ लक्षणिकं वा वाच्यार्थस्य कोशानकर्तृत्वान्वयासंभवादिति भावः। वाच्यस्यापीति। अपिना लक्ष्यसमुच्चयः। छ
त्रिण इति। अत्र एकसार्थवादित्वेन छत्रिगमनकर्तृत्वान्वयतास्यानुपपत्तिरेव जहल्लक्षणाबीजं। न च छत्रि
ष्विति तस्य मत्वर्थकेन्प्रत्ययांततया पदमहरूपत्वेन तच्छक्याप्रसिद्ध्या वाक्यसंबंधरूपलक्षणाया अ
भावेन कथमिदमुदाहरणमिति वाच्यं प्रतिपाद्यसंबंधलक्षणेत्येतदभिप्रायेणैतदुदाहरणदानात्। अन्यथा
काकेभ्यो दधि रक्ष्यतामित्याद्युदाहर्तव्यं तत्र काकपदस्य काकतदितरसाधारणदध्युपघातकत्वावच्छिन्नप
रत्वात्। केचित्तु छत्रपदस्यैवैकसार्थे जहल्लक्षणा तद्धितार्थः संबंधी तथा चैकसार्थसंबंधिनो गच्छंतीत्यन्वयबोध
इत्याहुः। तत्त्वमसीति। अत्र तत्पदवाच्ये सर्वज्ञत्वादिविशिष्टे त्वंपदवाच्यस्यांतःकरणादिविशिष्टस्याभेदान्व
यानुपपत्त्यो न यत्र विशेषणांशपरित्यागः तथा च तत्पदलक्ष्यस्य च त्वंपदलक्ष्येण सहाभेदान्वयोप ३९
पत्तिरित्यभिप्रायः इदमुदाहरणं तु जीवब्रह्मणोरैक्यं तु वादिनां ब्रह्मवादिनां सिद्धांताभिप्रायेणैव नैयायिकम

तेतस्यासंमतत्वात्। नैयायिकरीत्या तु सोऽयं देवदत्त इत्यादौ तत्तांशस्येदानीमसंभवात् हानं इदंतांशस्य संभवाद
हानमिति जहदजहल्लक्षणामाचक्षते। परे तु घटो नित्य इत्यादौ घटत्वस्येव सोऽयं देवदत्त इत्यादौ तत्तांशस्यो
पलक्षणतयाऽन्वयेन किंचिद्बाधकमिति किं जहदजहल्लक्षणयेति वदंति। गौण्याः पृथग्वृत्त्यंतरत्वं निराकरोति गौण्यपी
२ ति। ननु गंगायां घोष इत्यत्र तीरस्य प्रवाहस्येवाग्निर्माणवक इत्यादौ माणवके वाक्यस्याग्नेः साक्षात्संबंधो न सं
भवतीति कथं लक्षणा यानि वदेद् इत्यत आह। लक्ष्यमाणेति। लक्ष्यमाणो यो गुणः शुचित्वादिस्तत्संबंधरूपेत्य
र्थः। अयमभिप्रायः वाक्यसंबंधो हि लक्षणा स च क्वचित्साक्षात्संबंधः क्वचित्परंपरासंबंधः एवं च वाक्यस्याग्ने
स्तनिष्ठशुचित्ववत्त्वमेव संबंधो लक्षणेति। आलंकारिकास्तु पुनरेवमाहुः। तीरे घोष इति शब्दप्रयोगे सत्यपि यो
गंगायां घोष इत्यभिधानं तत् शैत्यपावनत्वादिप्रतीत्यर्थं न च सा प्रतीतिर्जहल्लक्षणयाप्युपपद्यते। केवलतीर
लक्षणयैवान्वयानुपपत्तिपरिहारे शैत्यपावनत्वादिविशिष्टलक्षणायां मानाभावात्तस्माद्व्यंजनाख्याश्रितवृत्तिरवश्यमं

गीकर्तव्येतितन्मतं निरस्यति व्यंजनापीति शक्तिलक्षणांतर्भूतेति। अर्थस्याव्यः नानार्थकस्थलेप्युदाहरणं धरात-
म्यादित्यादौ नु धरस्याद्धेन पर्वतानामविरतामपि शङ्क्वेव प्रतीतिः। अंत्र वति गंगायां घोष इत्यादौ तु शैत्यपावनत्वा-
दिविशिष्टतीरप्रतीतिरपि लक्षणासामान्यादेव तत्र लक्षणाकल्पिकायाः तात्पर्यानुपपत्तेरेवमभावात् किम-
तिरिक्तव्यंजनयेति न च शब्दशक्तिमूलाया व्यंजनाया अन्यथासिद्धत्वेपि अर्थशक्तिमूलायाः तस्याः नान्य-
थासिद्धिः तथाहि गच्छ गच्छसि चेत्कांत पंथानः संतु ते शिवाः। ममापि तत्र जन्म भूयाद्यत्र गतो भवानितीत्यादौ दे-
शियत्वगमनोत्तरं मम प्राणवियोगो भविष्यतीत्यतो न गंतव्यमित्याद्यर्थो व्यज्यते। न त्वत्र शक्तिलक्षणयोः
निर्वाहः इत्थं च व्यंजनाया आवश्यकत्वे तत्र आह अर्थशक्तिमूला चेति। वक्त्रर्थे अनुमानादिनेति अनुमानप्रका-
रश्च इयं मदीयगमनोत्तरकालिकप्राणवियोगवती विरहलक्षणात् प्रयोजकीत्यादिसादिरूपः। आदिना संभाव- ३९
नादिपरिग्रहः उत्कटैककोटिकसंशयः संभावना। आलोक एवं च विषयताविशेषस्य परिशुनरानुत्पत्तिविवेकी ज्ञो।

कानां स्वरसवाही शब्दादमुमर्थं प्रत्येमीत्यनुभवस्तथा वैयंजनिकी प्रमितिर्गीर्वाणगुरुणामप्यशक्यवारणेति व्यं-
जनासिद्धिरपरत्वेदे वेति मंतव्यं। अन्वयानुपपत्तेर्लक्षणाबीजत्वे यष्टीः प्रवेशयेत्यादौ लक्षणानुपपत्तिः तात्प-
र्यानुपपत्तेस्तथात्वे तु तस्यास्तत्रापि सत्त्वेन यष्टिपदस्य यष्टिधरे लक्षणासंभवतीत्याशयेनाह तात्पर्यानुपप-
त्तिरिति तत्प्रतीतीतितीरादिरूपार्थप्रतीतिरित्यर्थः नानार्थेति सैंधवमानयेत्यादिना नानार्थकस्थले सैंधवपदस्या-
श्वलवणोभयशक्तस्य तथाश्वबोधे तात्पर्यग्रहस्य कारणत्वमंतरा न नियतकालत्तद्बोधोपपत्तिरिति तत्र तत्कार-
णत्वस्यावश्यकत्वेन रसलक्षणबोधेन सर्वत्र तदावश्यकतेति भावः नवमो निष्क्रोकादौ शाब्दबोधानुपपत्तिः तत्र निरूढता रा
त्पर्यस्यासत्त्वादिति वाच्यं तात्पर्यस्य तत्प्रतीतीच्छारूपत्वपर्यवसाने तत्र तादृशतात्पर्यसत्त्वेनादोषात्। नच तथा-
पि तत्प्रतीतीच्छारहितशुकाद्युच्चारितवाक्यादपि शाब्दबोधस्यानुभवसिद्धतयाऽनुपपत्तेः परिहारासंभव इति शंक्यं
तत्रेश्वरीयेच्छामादायैवानुपपत्तेः परिहारसंभवादित्यलमनल्पजल्पनेन। ...करणादिकमिति। आदिमा

सशंखचक्रो हरिः पूज्य इत्यादौ हरिशब्दस्य भगवति तात्पर्यनिर्णायकस्य सशंखचक्र इति विशेषणादेः पस्थितः
कथं प्रकरणादेस्तात्पर्यग्राहकत्वमिति चेदित्थं इदं सैंधवपदं लवणबोधेच्छयोच्चरितं भोजनप्रकरणे ज्ञात्वा
दित्यादिरीत्या गृहाण। ग्राह्यमाकरमतं विशदीकरिष्यमाणः स्वसिद्धांतं प्रदर्शयति ग्राह्यमिति। अर्थज्ञानार्थत्वाच्छ
ब्दस्येति शब्दज्ञानस्यार्थज्ञानफलकत्वादित्यर्थः। एतावता प्रथमत एवार्थानुसंधाने लाघवमिति सूचितं। किं
चार्थबुद्ध्या वाक्यरचनेति न्यायेनार्थज्ञानमंतरा आकांक्षितशब्दानुसंधानरूपशब्दाध्याहारस्यैवासंभवेन प्र
थमतोऽर्थाध्याहारस्यैवावश्यकत्वे साहार्थमवीतिय यथा कथंचिदुपस्थितपदार्थानां शाब्दबोधानुदयेन पदजन्य
त्वस्योपस्थितिविशेषणतायामावश्यकतया तादृशोपस्थितिसंपत्तये शब्दाध्याहार एवानायत्याऽनुसर्तव्य इ
त्याह पदविशेषेति विशेषपरस्यापि प्रयोजनं दर्शयितुं घटः कर्मत्वमित्याद्युद्धावनं तत्र कर्मत्वादिपदजन्य २७
कर्मत्वाद्युपस्थितेः सत्वेपि घटपदोत्तरामादिपदजन्यकर्मत्वाद्युपस्थितेरसत्वेन न शाब्दबोध इति मतेः शाब्दबोधप्रसं

द्वितीयं यथा योगादिपदं योगरूढिभ्यां परस्परसहकारेणार्थप्रतिपादकं ३

ग इति भावः। पदविशेषजन्यत्वस्य पदविशेषजन्यत्वेपि बोध्यं तेन घटमानयेत्यादौ घटादिपदादाकाशादेरुपस्थि
तावपि न शाब्दबोध इति दिक्। यद्यपि पदत्वावच्छिन्नं चतुर्विधं योगिकं। रूढं। योगरूढं। योगिकरूढं चेति। योगोऽवयवशक्तिः।
तन्मात्रेणार्थप्रतिपादकमाद्यं यथा पाचकादिपदं। रूढिः समुदायशक्तिः तन्मात्रेणार्थप्रतिपादकं तृतीयं। य
था पंकजादिपदं। योगिकं च तद्रूढं चेति व्युत्पत्त्या योगेन रूढ्या च परस्परसहकारेणार्थप्रतिपादकं चतुर्थं य
थाउद्भिदपदं। योगेन तरुगुल्मादेः रूढ्या तु यागविशेषस्य वाचकं तथापि योगरूढं प्रदर्श्य तत्र योगरूढ्योः स्वरू
पप्रदर्शनेन तद्रीत्याऽन्यत्रापि बोद्धुं शक्यमित्यभिप्रायेण पंकजादिपदे योगरूढी प्रदर्शयति पंकजादीति। योग
रूढिरिति योगसहिता रूढिरित्यर्थः। ननु पंकजादिशब्देष्वपि योग एवास्तु तावतैव निर्वाहादित्याशंक्य पंक।
जशब्दस्य पद्मत्वावच्छिन्ने शक्तिरित्यंतरा नियमेन पद्मत्वावच्छिन्नभानमनुभवसिद्धं न निर्वहतीति पद्मत्वावच्छि
न्ने रूढिरावश्यकीत्याह नियतेति। नियतपद्मत्वावच्छिन्नभानानुभवे विप्रतिपन्नं प्रत्याह अन्यथेति निय

तपघटत्वावच्छिन्नमानोपयोगिसमुदायशक्त्यनंगीकार इत्यर्थः प्रयोगेत्विपंकजपदप्रयोगेत्यर्थः। यद्यपि कार्यान्वि
तेशक्तिरितिप्रभाकरमतंतथापिसिद्धार्थपरवाक्येपिव्युत्पत्तेर्व्यवस्थापितत्वेनतत्साधारण्यायतन्मतंपरिष्कृत्य
दर्शयति इतरान्वित इति। अन्वितेशक्तिरितितुनिष्कर्षः। अयमभिप्रायः कथंचिदुपस्थितपदार्थानां शाब्दबोधवा
रणायतत्तद्विषयकशाब्दबोधंप्रतिज्ञानजन्यतत्तदुपस्थितित्वेनहेतुतायाःकल्पनीयतयाऽन्वयांशेपिशक्तिरपे २
क्षिता अन्यथातादृशसामान्यकार्यकारणभावभंगापत्तेः। नच संसर्गविषयतापितत्तद्विषयताशालि
शाब्दबोधंप्रतिवृत्तिज्ञानाधीनतत्तदुपस्थितित्वेनहेतुत्वसमात्तांतथाच अन्वयांशेशक्त्यनंगीकारेपिन
क्षतिरितिवाच्यं तथासतिकार्यतावच्छेदकगौरवापत्तेः एवंचान्वितोघटोघटपदवाच्यइत्याकारकश
क्तिज्ञानमेवशाब्दबोधप्रयोजकमिति। केचित्तु इतरान्वितेशक्तिरित्यस्यकार्यान्वितेशक्तिरित्यर्थमाहुः। ४०
तद्युक्तिकंनैयायिकमतेदर्शयति। अन्वयस्येति। पदार्थसंसर्गस्यपदसमभिव्याहारबलादेवशाब्दबोधे।

भानसंभवात्तादृशसंसर्गांशेपिशक्तिर्नकल्पनीयेतिसमुदितार्थनिष्कर्षः। अयमाशयः तद्विषयकशाब्दबु
द्धिंप्रतिवृत्तिज्ञानाधीनतदुपस्थितित्वेनानुगतकारणभावेनसंभवतिशक्तित्वलक्षणस्यसाधारणस्यदु
ज्ञित्वस्यलघुभूतस्यदुर्वचत्वात् अपितुसंकेतग्रहाधीनतत्तदुपस्थितित्वेनैकाकारणतालक्षणाज्ञानज
न्यतदुपस्थितित्वेनचापराकारणतास्वीकर्तव्या। परस्परतत्तदुपस्थितिजन्यशाब्दबोधेव्यभिचारवारणा
यचतत्तत्कारणाव्यवहितोत्तरत्वंतत्तत्कारणजन्यतावच्छेदककोटौनिवेशनीयं। एवंचतत्त्वमुपस्थापित
स्यापिपदार्थद्वयसंसर्गस्यशाब्दबोधोपगमेव्यभिचाराप्रसक्त्यादर्शितद्विविधकार्यकारणभावस्यनि
र्वाहेनेतिकिमन्वयांशेशक्तिकल्पनेन। आकांक्षादिरहितपदसमुदायाच्छाब्दबोधवारणायकांक्षा
देःशाब्दबोधहेतुत्वमभिहितंमूलकृतातच्चनवीनमतेननिर्वहतीतितज्ज्ञानस्यहेतुतामाह आकांक्षा
दिज्ञानमिति। आदिनायोग्यतापरिग्रहः अन्यथा। आकांक्षादेःशाब्दधीहेतुत्वेमूलेपदस्येत्यादिपसद

स्यपदस्याभावप्रयुक्तमन्वयबोधाजनकत्वंतत्पदसमभिव्याहृततत्पदत्वमाकांक्षेत्यर्थः।प्रयुक्तत्वंचा
कारणाभावात्कार्याभावइतिप्रतीतिसाक्षिकःस्वरूपसंबंधविशेषः।अजनकत्वांतंपरिचायकं।एकप
दार्थेऽपरपदार्थवत्त्वंयोग्यतेतिमतेसंवादिनिश्चयसाधारणज्ञानत्वावच्छिन्नंशाब्दधीहेतुःबाधनिश्च
याभावोयोग्यतेतिनवीनमतेतुस्वरूपसत्त्वेवयोग्यतातद्धेतुरितिरिक्मीमांसकःशंकतेनन्विति।वेदस्य
प्रवरोक्तत्वमनुमानेनव्यवस्थापयतिवेदइति।नन्वष्टादशानांपुराणानांकर्तासत्यवतीसुतइतीत्यादिप्रमा
णबलेनभारतादेःकर्तोपलभ्यतेनहितथावेदे।तथाचस्मर्यमाणकर्तृकत्वस्यभारतादौसाध्यव्याप
कत्वात्वेदेचसाधनाव्यापकत्वादुपाधित्वेनकथमिदमनुमानंसाधकंभवेदित्याशंकतेनन्वेति।गोतमादिभिःशि
ष्यपरंपरयावेदकर्तृत्वोपदेशोऽविवर्दंतंप्रत्यादृतस्मात्तेपानादिति[illegible]कृततत ईश्वरादित्यर्थः।तपधातोर्लिटःका ४२
नडादेशेएत्वाभ्यासलोपयोःनिष्पन्नंतेपानेति।सर्वोऽपियुगकारइतीति।अत्रैतत्काणिकगकारेपूर्वकालिका

तपः

कारणेदोषाभावेसत्येववर्णानामनित्यत्वेनसंभवतीतिभावः।अनित्यत्वादिति।तर्हिप्रत्यभिज्ञाविरोधइत्यतआह
सोऽयमिति।उत्पत्तिविनाशप्रत्यययोरन्यार्थकत्वकल्पनामपेक्ष्यतत्प्रत्ययस्यतथात्वकल्पनेलाघवमितिभ
दृष्टं।अग्निमीळइत्यादावादौईवीअकारोणकारोवर्णत्वादिरूपातत्त्वोत्तरत्वमुच्चरितोत्तरक्षणवृत्तित्व
रूपंवाच्यमित्युक्तंचवर्णानांनित्यत्वांगीकारेऽपिअनित्यक्रमघटितायाआनुपूर्व्याअनित्यत्वात्तद्विशिष्टवाक्यस
मुदायात्मकवेदस्यतदभिमतंनित्यत्वंनसिध्यतीतिवर्णानामनित्यत्वमेवोचितमित्याशयेनाहवर्णानामिति।यद्यपि
स्मृत्यादीनामाप्तोक्तत्वादेवप्रामाण्यंसिध्यतितत्कर्तृमन्वादीनामाप्तत्वात्तथापितेषामाप्तत्वेविप्रतिपन्नंप्र
त्याहमन्वादीति।आचाराणामिति।आचारप्रतिपालकशिष्टवाक्यानामित्यर्थः।एतेनप्रमाणविभागव्याख्याता
नांकानिरस्ता।वेदार्थज्ञात्वेवमन्वादिभिःतदर्थकस्मृत्यादीनिविरचितानिअतःतेषांप्रामाण्यमितिमनसिकृत्वा
हवेदमूलकत्वेयेतिन्नुतर्हिसवेदःकुतोनोपलभ्यतइत्यतआहस्मृतिमूलेति।तन्मूलभूतेत्यादिस्मृत्यादिमूल

मूलताकांचिच्छाखापाठतःपरिभ्रष्टेत्यनुमीयतइत्यर्थःवाक्योत्सादस्य।वाक्योच्छेदस्य।ननुसमानानुपूर्वीकवे
दपाठस्यसंप्रदायविच्छित्त्यानाशाद्वेदेकतिपयवाक्योच्छेदस्यकल्पयितुमशक्यात्कालेपिपठ्यमानवेदएवविधिवाक्यानि
ततश्चाविद्यमानवाक्यानांस्मृतिमूलत्वमस्त्वत्यतआहविप्रकीर्णेति।अद्यत्वादिति।स्मृत्यादिसमानार्थकवा
क्यानांपठ्यमानवेदेनुपलंभादितिभावः।नित्यानुमेयइति।नित्यमनुमेयइत्यर्थः।वर्णानुपूर्वीज्ञानाभावेनेति।
तादृशज्ञानस्याविशिष्टबोधहेतुत्वादन्यथानदीदीनादिशब्दैरर्थविशेषबोधानापत्तेरितिभावः।शब्दस्यप्र
क्रमाणत्वमनंगीकुर्वतांवैशेषिकाणांमतंदूषयितुमुपन्यस्यतिनन्वेतानीत्यादिना।एतानिपदानि।घटमान
येत्यादीनिपदानि।स्मारितार्थसंसर्गवंतीतिस्मारितार्थसंसर्गज्ञानपूर्वकाणीत्यर्थः।संसर्गेतात्पर्यविषयत्वंनिवे
शनीयंतेनसंसर्गांतरमादायनार्थांतरता।अर्कांगादीत्यादिनायोग्यतासत्त्वोपस्थित्योःआकांक्षाविरहादितिपदक ४२
दंबकेव्यभिचारवारणायआकांक्षेति।सर्वसंमतत्वादिति।तथाचकार्यविवादएवानुरोधेनशब्दःप्रमाणंत

त्वमितिभावः।मीमांसकःशंकतेनन्वर्थेति।दिवानभुङ्क्तइत्यर्थेदृष्टेप्रत्यक्षतोज्ञातेश्रुतेशब्दादवगते।एतेनदृष्टा
र्थापत्तिःश्रुतार्थापत्तिश्चेत्यर्थापत्तेर्द्वैविध्यंसूचितं।पीनत्वान्यथानुपपत्त्येति।पीनत्वस्यरात्रिभोजनंविनानुपपत्त्येत्य
र्थः।अत्रेदमवधेयंयद्विनायदनुपपन्नंतत्तदुपपादकमितिरात्रिभोजनमुपपादकं।पीनत्वमुपपाद्यं।उपपा
दकज्ञानंफलं।उपपाद्यज्ञानंकरणंफलकरणयोरन्ययोरर्थापत्तिशब्दोवर्ततेफलेऽर्थस्यापत्तिःकल्पने
तिव्युत्पत्त्या।करणेतुअर्थस्यापत्तिःकल्पनायस्मादिति।व्युत्पत्त्येतिव्यतिरेक्यनुमानेनैवगतार्थत्वादर्थापत्तेःप्र
माणांतरत्वमनुचितमितिसमाधत्तेदेवदत्तइति।दिवामात्रभोजिनिपीनेव्यभिचारवारणायहेतौसत्यंतं।अदो
रात्रभोजिन्यपीनेव्यभिचारवारणायविशेष्यं।योगाद्यजन्यपीनत्वपरं।तेनभोजनशून्येयोगिनिपीनेनव्यभि
चारः।संभवैतिह्ययोरतिरिक्तप्रमाणत्वंवदतांपौराणिकानांमतंदूषयतिज्ञातेपंचाशदित्यादिना।अनुमान
मेवनतुप्रमाणांतरमित्यर्थः।ज्ञातवानित्युक्तेपंचाशद्वानितिज्ञानंभवतितस्यानुमानेनैवनिर्वाहात्।ज्ञातस्यपं

चारश्चाप्यत्वादितिभावः। अज्ञातमूलेति। विनिगिष्या निश्चितप्रथमवक्तृकः। शब्दः नन्तुप्रमाणांतरमित्यर्थः। तादृशा
यथार्थत्वेन शब्दप्रमाणमध्ये ऽन्तर्भावः। अन्यथात्वप्रमाणमेवेति हृदयं। नन्वनयाचेष्टया यमर्थो बोद्धव्य इति सं
केतितचेष्टयाविजातीयप्रमितिजननाच्चेष्टापि प्रमाणांतरमिति चेदंतं निरस्यति चेष्टापीति। चेष्टाद्यनुमानद्वारे
ति। शब्दद्वाराऽनुमानद्वारा वा न तु स्वातंत्र्येणेत्यर्थः। चेष्टायाकल्पितस्य प्रमापकत्वे गौरवादनुमानानुसरणं।
व्यवहारेति। प्रमात्मकज्ञाने हेतुरित्यर्थः। उपसंहरति। तस्मादिति। इति। इतिशब्दः परिच्छेदः प्रमाणप्रसंगात
प्रमाणस्य परतोग्राह्यतां व्यवस्थापयिष्यन्नाह ज्ञानानामिति। षष्ठ्यर्थः आधेयत्वं तस्य चान्वयस्तद्वति तत्प्रकार
कत्वेतच्च तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वं। तच्छब्दार्थः घटत्वादिरूपः। स्वतोग्राह्यमिति। ज्ञानग्राहकसामग्री
जन्यग्रहविषय इत्यर्थः। परत इति। ग्राह्यमित्यनुषज्यते। अनुमानादिजन्यग्रहविषय इति तदर्थः। तत्रापि विचारे ४२
प्रयोजकत्वसप्तम्यर्थः विप्रतिपत्त्यावन्वेति। कथं तस्याः विचारप्रयोजकत्वमिति चेदत्र वदंति विरुद्धार्थप्रतिपाद

कवाक्यद्वयं हि विप्रतिपत्तिः। तया प्रामाण्यशंकाकवलिततत्तद्वाक्यार्थबोधद्वारा मध्यस्थस्य संशयो जन्यते इत्येक
तरकोटिनिश्चयाय न्यायप्रयोगादिरूपो विचारः। एवं च विचारोपयोगिसंशयजनकत्वाद्विप्रतिपत्तेः विचारोपयो
गित्वमक्षतमिति। ज्ञानप्रामाण्यमिति पक्षनिर्देशः। अत्र तद्वति तत्प्रकारकज्ञानत्वरूपमेव प्रामाण्यं पक्षः नतु प्रमि
तिकरणत्वरूपमिति तात्पर्यग्राहकं ज्ञानपदं वस्तुतस्तु तद्वति तत्प्रकारकज्ञानत्वस्य घटत्वपटत्वादिरूपार्थभेदे
न भिन्नतयाकस्यापि प्रामाण्यस्य यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं न संभवत्यतः पक्षधर्मघटितप्रामाण्यं यदाप
क्षत्तदा तद्धर्मप्रकारज्ञानग्राहकयावद्ग्राह्यत्वमेव साधनीयं नतु सामान्यतो ज्ञानग्राहकयावद्ग्राह्यत्वमिति तात्प
र्यग्राहकं ज्ञानपदं तत्प्रामाण्येत्यादि। तत्प्रामाण्यग्राहिका यावती ज्ञानग्राहिका सामग्री तज्जन्यग्रहविषयो
न वेत्यर्थः। एतादृशोग्रहः गुरुमते व्यवसायः मुरारिमिश्रमते ऽनुव्यवसायः भट्टमते च ज्ञाततालिंगकानुमितिः। अत्र
गुरुमते सर्वस्मिन्नेव ज्ञाने मितिमातृमेयेषु तत्र पंत्रासते तन्मते घटत्वेन घटमहं जानामीत्याकारकस्येव व्यवसा।

यस्योत्पन्नेः। एवंचव्यवसायस्यस्वप्रकाशात्मकतयास्वेनैवस्वगतप्रामाण्यस्यग्रहणाद्भवतिप्रामाण्यस्यस्वतोग्रा
ह्यत्वंकिंचिद्विशेष्यविशेषणज्ञानस्यकारणतायास्तेरनंगीकारादनुपस्थितस्यापिप्रामाण्यस्यज्ञानसंभवात्।
मिश्रमतेत्वयंघटइत्याकारकज्ञानानंतरंघटत्वेनघटमहंजानामीतिज्ञानविषयकलौकिकमानसमुत्पद्यतेते
नप्रामाण्यस्यग्रहणं।भट्टमतेचज्ञानस्यातींद्रियतयाज्ञाततालिंगकानुमितेरेवप्राथमिकज्ञानग्रहरूपतयातयाप्रा
माण्यग्रहस्तत्रानुमानप्रयोगस्तुघटोघटत्ववद्विशेष्यकघटत्वप्रकारकज्ञानविषयःघटत्वप्रकारकज्ञाततावत्त्वात्।
यन्नैवंतन्नैवमितिज्ञातताचस्वविषयकोज्ञानजन्यःअतिरिक्तःपदार्थइतिमतविवेकः।यावत्त्वविशेषणेस्वस्येवाया
हकांतंसार्थकमित्यभिप्रेत्यप्रथममतस्यैवप्रयोजनंदर्शयतिअनुमानेनेतिप्रामाण्यस्येत्यादिः।लिंगसाधनेति।नै
यायिकमतेपिइदंज्ञानंप्रमासमर्थप्रवृत्तिजनकत्वादित्यनुमानेनइदंज्ञानंप्रमेयाप्रवाकेनवथाद्युत्वादितिज्ञा ४४
तन्नैयायिकेनिर्विषेसाध्येबाधवारणायेत्यपिबोध्यं।यावदितीति।नतुसामग्र्यांयावत्त्वविशेषणमयुक्तंयावत्साम

ग्रीजन्यग्रहाप्रसिद्धेः नहिसर्वाभिर्ज्ञानसामग्रीभिर्ज्ञानसामग्रीभिरेकंज्ञानंजन्यते।अन्यथायावत्सामग्र्याःविशिष्योपादाय
तज्जन्यग्रहविषयत्वंसाध्यतइतिवाच्यंअनुव्यवसायादिसामग्रीणांतादृप्येणप्रवेशोमतत्रयसाधारण्यानिर्वाहा
दितिचेत्रयतःयावदितिफलतोयद्विशेषणंतथाचज्ञानग्राहकसामग्रीजन्ययावद्ग्रहविषयत्वमितिफलितं।त
त्तद्धर्मप्रकारकज्ञानग्राहकसामग्रीजन्यग्रहत्वव्यापकविषयिताप्रतियोगित्वमितितुनिष्कर्षइतिसंक्षेपः।प्रामा
ण्याग्रहादितिव्यवसायमिष्टेत्यादिः।प्रामाण्याविषयीकरणादित्यर्थः।अप्रामाण्याग्राहकेतीति।तथाचतादृशज्ञा
नसामग्र्याःसाध्यकोटौप्रविष्टत्वान्नयाप्रामाण्यस्याग्रहणेपिनबाधइतिभावः।अनुव्यवसायनिष्ठेत्यादि।तादृशानु
व्यवसायनिष्ठंअप्रामाण्यंतद्विशेष्यकत्वविशिष्टाप्रामाण्यप्रकारकत्वरूपंप्रामाण्यंतद्ग्राहकस्येत्यर्थः।सामान्ये
नवुंसकनिर्देशःस्वतस्त्वंनस्यादिति।यदानिरुक्तप्रामाण्यस्यपरतस्तदाअप्रामाण्यग्राहकाप्रामाण्यप्रकारकज्ञा
नजनकसामग्र्याएवसाध्यकोटौनिवेशनीयतयातादृशसामग्र्याअप्रसिद्धत्वान्नस्यस्वतोग्राह्यत्वंनसिध्येदित्या

र्थः॥ सप्तमितत्पुरुषमपि चेत्याह तस्मिन्निति। एतस्यैव विवरणं ग्राह्यप्रामाण्याश्रय इति। याद्दशप्रामाण्यं प्रकृतानुमि
तावुद्देश्यं ताद्दशप्रामाण्याश्रयविशेष्यकप्रामाण्यप्रकारकज्ञानाजनकेत्याह कांतार्थः॥ इदंज्ञानप्रमेत्यनुव्यवसा
यनिष्ठप्रामाण्यग्राहकसामग्र्या व्यवसायविशेष्यकप्रामाण्यप्रकारकज्ञानजनकत्वेपि अनुव्यवसायविशेष्यकप्रामाण्य
प्रकारकज्ञानजनकत्वाभावात् अप्रामाण्यवद्विशेष्यकत्वादिघटितप्रामाण्यस्य स्वतोग्राह्यत्वसिद्धिरित्याह उक्तलक्ष
ण इति। इदंज्ञानमप्रमेत्यर्थः अधिकमस्मदीयाभिनवमणिदीधितिव्याख्यायामनुसंधेयं। इत्थं विप्रतिपत्तिं प्रदर्श्य
मीमांसकमतमुपन्यस्यति नन्विति। स्वत एवेत्यादि। घटत्वादिघटितप्रामाण्यं निरुक्तं सामग्री तत एव गृह्यत इत्यर्थः। अ
प्यर्थकेनैवप्रकारेणानुमानादिपरिग्रहः। अनुव्यवसायेनेति। इदं च मिश्रमताभिप्रायेण मतत्रयसाधारण्येन तु
प्राथमिकज्ञानग्रहणेति ध्येयं तत्संबंधस्यापीति। घटघटत्वयोर्यः संबंधस्तस्यापीत्यर्थः। नन्वनुव्यवसाये कथं संबं ४५
धस्य भानमित्याशंक्य यथा घटघटत्वयोर्व्यवसायरूपप्रत्यासत्त्या भानं तथा तत्संबंधस्यापि व्यवसायरूपप्रत्या

त्यासत्तेरविशेषादित्याह। व्यवसायेति। ननु तावता कथं प्रामाण्यस्य भानमत आह। पुरोवर्तिनि प्रकारसंबंधस्यैवे
ति। पुरोवर्तिनि यः प्रकारसंबंधस्तद्वृत्तित्वस्यैवेत्यर्थः। अप्रामाण्यस्थाने यायिअपि अनुव्यवसाये विशेष्यत्वप्रकार
त्वयोर्भानमंगीकुर्वंति पुरोवर्तिनं घटत्वेन जानामीत्याकारकस्यैवानुव्यवसायस्यांगीकारात् परं तु पुरोवर्तिनी घ
टादौ घटत्वादिरूपप्रकारसंबंधभानं मंगीकुर्वंति अतः तत्प्रकारसंबंधभानस्य व्यवस्थापने किमपि गौरवमिष्ट ना ४
मिति प्रामाण्यस्य भानं सिध्यति अनुपस्थितयोः विशेष्यत्वप्रकारत्वयोर्भानस्यासर्वसंमतत्वादिति। जलज्ञानमित्या
दि। जलज्ञानमित्यादिजलज्ञानं प्रमा न वेत्याकारकः अनभ्यासदशायां प्राथमिकजलज्ञानग्रहोत्तरदशायामनुभ
वसिद्धः प्रमात्वसंशयो न स्यादित्यर्थः। निश्चितत्वादिति। तद्धर्मनिश्चयस्य तदभाववत्ताज्ञानं प्रतिबंधकत्वादिति भा
वः। अत्र ज्ञातो घट इति प्रतीतिर्ज्ञानविषयकल्पनेनैव निर्वाहे। तिरिक्तज्ञानताकल्पनीया गौरवात् मानाभा
वेति तन्निरसनप्रकारो बोध्यः तस्मादिति। अनभ्यासदशायां संशयानुत्पत्तिरित्यर्थः। एतस्य स्वतोग्राह्यत्वाभावान्वयः

परतोऽप्रामाण्यस्यत्वमितिप्रामाण्यस्यानुमानादितएवग्राह्यत्वमित्यर्थः।प्रवृत्तेःसंभवादिति।एतेनमीमांसकैरभ्युपगततायां
प्रामाण्यनिश्चयस्यप्रवृत्तिहेतुतायांव्यभिचारोदर्शितः।नचनिष्कंपप्रवृत्तावेवप्रामाण्यनिश्चयस्यहेतुतासकंपप्रवृ
त्तौतुप्रामाण्यसंशयस्यनिष्कंपत्वंसकंपत्वंचविषयताविशेषः।एवंचतत्रसकंपप्रवृत्त्यंगीकारेपिप्रामाण्यनिश्चयस्य
हेतुतायांकथंव्यभिचारइतिवाच्यंतथापितत्रप्रामाण्यस्याप्रामाण्यस्यवाज्ञानंनासीदासीत्केवलजलादिज्ञानंत
त्रप्रवृत्तिप्रदर्शनेनप्रामाण्यसंशयहेतुतायांव्यभिचारस्यदुर्वारत्वात्तन्नचैवंजलादिज्ञानेऽप्रामाण्यनिश्चयकाले
प्रवृत्तिःस्यादितिशंकनीयं।अगृहीताप्रामाण्यकजलादिज्ञानत्वेनतद्धेतुतास्वीकारेणदोषादितिसंक्षेपः।जलज्ञा
नेसतीति।एतावतावक्ष्यमाणस्यप्रामाण्यव्यवस्थापकहेतोःस्वरूपासिद्धिशंकानिराकृता।तदाज्ञानेपक्षस्यासत्त्वाद
दृष्टवैशिष्ट्यत्वमिति।समर्थेति।तद्विशेष्यकतत्प्रकारकेत्यर्थः।अन्वयमुदाहरणंसंभवाव्यतिरेकमुदाहरणंप्रसदृशंत ४६
माद्यपन्नेवमिति।यदप्रमातदसमर्थप्रवृत्तिजनकमित्यर्थः।व्यतिरेकिणं।व्यतिरेकेव्याप्तिमता।निश्चीयते।अनुमीयते

द्वितीयादिज्ञानेष्विति।द्वितीयादिजलज्ञानेष्विति।तत्सजातीयत्वलिंगेन।प्रवृत्तेज्ञानसजातीयत्वरूपलिंगेन।समर्थप्रवृत्तिजनक।
त्वेनेतियावत्।गृह्यतइति।प्रामाण्यमनुमीयतइत्यर्थः।एवंतत्रोपरतत्त्वंव्यवस्थाप्योत्पत्तौतन्निरूपयतिप्रमायाइति
प्रमासाधारणकारणमिति।प्रमात्वाधिकदेशवृत्तिधर्मानवच्छिन्नममानिष्ठकार्यतानिरूपितकारणताशालीत्यर्थः।
तेनमात्रहेतुभूतात्ममनस्संयोगादेःभ्रमजनकपित्तादिदोषाणांचव्युदासः।अप्रमासाधारणकारणत्वमप्येवमेवपरि
कर्त्तव्यं।चतुर्विधप्रमायांहेतुभूतंगुणंक्रमेणोपपादयतितत्रेति।चतुर्विधप्रमायामध्यइत्यर्थः।इत्याद्यूहनीयमि
ति।पीतशंखादित्यादित्रमेपित्तादिर्दोषः।इदंरजतमित्यादिभ्रमेचचाकचक्यादिरित्यूहनीयमित्यर्थः।अप्रमात्वस्यपर
तस्त्वंप्रयुक्तिकंदर्शयितिपुरोवर्त्तिनीति।अनुपस्थितत्वादिति।अविषयीकरणादित्यर्थः।तथाचप्रत्यासत्तेरभावाद
प्रमात्वस्यानुव्यवसायेनग्रहणंनसंभवतीतिभावः।अप्रमात्वं।तदभाववद्विशेष्यकत्वविशिष्टतत्प्रकारकत्वं।पर
तएवगृह्यतइति।अनुमानादितएवगृह्यतइत्यर्थः।अनुमानप्रयोगस्तु।इदंज्ञानमप्रमाविसंवादिप्रवृत्तिजनकत्वा

त्। यत्रैवं तत्रैवं तथा प्रमेति। गुरुमतं निरस्यान्यथाख्यातिं व्यवस्थापयति नन्वित्यादिना। यथार्थत्वात्। अयथार्थज्ञानमे
व नास्तीति। तदभाववद्विशेष्यकत्वविशिष्टतत्प्रकारकत्वं। परत एव गृह्यत इति। अनुमानादित एव गृह्यत इत्यर्थः। अ
नुमानप्रयोगस्तु इदं ज्ञानमप्रमा विसंवादिप्रवृत्तिजनकत्वात् यत्रैवं तत्रैवं यथा प्रमेति। गुरुमतं निरस्यान्यथाख्या
तिं व्यवस्थापयति नन्वित्यादिना। यथार्थत्वात्। प्रमात्वात्। यथार्थज्ञानमेव नास्तीति। तदभाववद्विशेष्यकतत्प्रकार
कत्वरूपायथार्थत्वं ज्ञाने वृत्तिनेत्यर्थः। तेन न सिध्यसिद्धिभ्यां व्याघातः। अयथार्थत्वस्य तु प्रसिद्धिरिकादौ बोध्या। अ
न्यथाख्यातीति। तदनंगीकारे पुरोवर्त्तिविशेष्यकरजतत्वादिरूपेष्टतावच्छेदकप्रकारकज्ञानस्य संवादिविसंवादिसा
धारणप्रवृत्तिजनकतया तत्र प्रवृत्तिरेव न स्यादिति भावः। रजतस्मृतीति। क्रमनियतपूर्ववर्त्तिभ्यामित्यादिः। संनवा
दिति। तथा च प्रवृत्तिं प्रति विशिष्टज्ञानत्वेन कारणत्वे च नास्तीति तद्विरोधेनान्यथाख्यातिकल्पनं न संभवतीति भावः ८७
नन्वेवं यत्र नेदं रजतमिति बाधग्रहः तत्रापि प्रवृत्तिः स्यादत आह उपस्थितेति। एतावता स्मृतिरूपकारणापेक्षा स्फुटी

कृता। इष्टभेदाग्रहस्यैव। रजतादिरूपेष्टभेदाग्रहाभावस्यैव। एवंप्रकारेण विशिष्टज्ञानस्य प्रवर्त्तकत्वव्यवच्छेदः। सर्वत्रेति
रजते शुक्तौ चेत्यर्थः। रजतस्थले विशिष्टज्ञानस्यैव प्रवृत्तिं प्रति कारणत्वमेष्टव्यं अन्यथा धर्मवर्त्तिज्ञानयोरिष्टभेदाग्र
हत्वस्यापि तु धर्मावच्छिन्नत्वस्य च कारणतापत्तेः एवं च तत्र प्रवृत्तिं प्रत्यन्वयव्यतिरेकाभ्यां विशिष्टज्ञानस्य कारणता
यां कॢप्तायां बाधकाभावात् प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानत्वेनानुगतकारणतावस्यैव कल्पनी
यतया विसंवादिप्रवृत्तेरपि तत्कार्यतावच्छेदकावच्छिन्नतया तत्पूर्वं विशिष्टज्ञानस्य कल्पनीयत्वादन्यथाख्याति
रिति बाधे चेति समाधत्ते सत्यरजतेति। रजतत्वप्रकारकज्ञानस्येति तादृशज्ञानत्वावच्छिन्नस्येत्यर्थः प्रवृत्तिजनक
तया विशिष्टज्ञानस्यैव। पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानस्यैव एवं चेष्टभेदाग्रहस्य व्यवच्छेदः कल्प
नात् अनुमानात् प्रयोगस्तु अयं पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानजन्या प्रवृत्तित्वात् रजतीय
प्रवृत्तिवदिति। स्यात्तत् यत्र स्वेष्टसन्निकर्षस्य कारणतया रजतत्वांशे तदभाववेन रूपं शुक्तावि इदं रजतमिति त्वस्य ह

मितिचेन्नैवंअलौकिकसन्निकर्षव्यापिप्रत्यक्षजनकतयावच्छापितत्वेनज्ञानलक्षणप्रत्यासत्तेरेवप्रकृतेतत्सं
भवात्।अन्यथायथार्थानुभवस्यैवविध्यकथनंमूलेसंगतंस्यात्ज्ञानस्यानुभूतपदार्थस्मरणकल्पित्वादिरू
पधानुभवस्यानाहार्येजायमानस्यबाधितार्थविषयकस्यानुभवसिद्धत्वादतस्तत्रस्वप्नस्येति।यद्यपिप्रदेशवि
शेषावच्छिन्नमनस्संयोगःस्वप्नस्तथापितदसमवायिकारणकज्ञानेस्वप्नशब्दोभाक्तइत्यवधेयं।वास्तुवादिरू
पत्वासंभवादाहमानसोति।यत्तुस्मृतिरूपंस्वप्नतित्वानमितिगतज्ञाप्यादिविरूद्धमित्युपेक्षितं।कोट्योरव्याप्यव
त्तित्वज्ञानोत्तरंजायमानेएकस्मिन्धर्मिणिइमावीन्नयप्रकारकसमुच्चयेतिव्याप्तिवारणायविरोधविषयक
त्वस्यदेयेपिनानेत्वस्यावरूपकतेर्विदर्शायितुमाहार्यपरत्वविरुद्धेतिनानेतीति।एकधर्मिनिष्ठविशेष्यतानिरू
पितविरुद्धनानाधर्मनिष्ठप्रकारताकत्वाभावान्नातिव्याप्तिरितिभावः।नन्वेवंविभिन्नरूपेणैकधर्मिविशेष्यकविरु ४८
द्धानेकधर्मप्रकारकज्ञानेतिव्याप्तिरितिचेत्कं।एकधर्मावच्छिन्नविशेष्यताघटितपरिष्कारकरणेनादोषादितिदिक्

तन्त्रांतरेअन्यस्मिन्नेसर्वस्मिन्नेवमिथ्याशब्दप्रयोगस्यानाहतत्वाद्भाववतीतिप्रमावारणायइदंतद्भाववद्विशेष्या
कत्वावच्छिन्नवत्प्रकारताकेत्याद्यर्थविवक्षणान्नसहृदयंवनेतिप्रसंगःसंशयस्येच्छायाश्चवारणायसंशया
न्यज्ञानार्थकनिश्चयपदमितिसंक्षेपः।मूलेव्याप्यारोपेणेति।आहार्यव्याप्यवत्त्वानुमत्तकइत्यर्थः।आहार्यत
ज्ञानिमान्नेप्रसंगवारणायजन्यांतं।नायंपुरुषइतिनिश्चयसत्त्वेशाखादौकरादिमान्यंपुरुषइत्याहार्यारोप
त्वान्नातिव्याप्तिवारणायप्रथममाहार्यपदं।आरजतत्वव्याप्याभाववत्त्वाग्रहकालेआहार्यंयद्रजतत्वव्याप्यवत्त्वज्ञा
नंतज्जन्येइदंरजतमित्यनाहार्यज्ञानेअतिव्याप्तिवारणायद्वितीयमाहार्यपदं।तर्केआपाद्यव्यतिरेकनिश्चयःआ
पाद्यापादकयोर्व्याप्तिनिश्चयश्चकारणमितिध्येयं।तर्कस्तुमानसविपर्ययरूपएवेतिकथनंयथार्थस्यैवविध्यकथ
नमित्याहयद्यपीति।प्रमाणानुग्राहकत्वंप्रमाणेनप्रमायांजननीयायांप्रतिबंधकविघटनद्वारोपयोगित्वं।
नेदेनेति।तर्कत्वरूपेणैवअज्ञरूपेणेत्यर्थः।तर्कस्यप्रमाणानुग्राहकत्वस्यापनायतथाकथनमितिभावः।ननुसर्वेषाम

नुकूलतयावेदनीयमित्यादिमूलं सुखादिलक्षणपरं न त्ववतिप्रसक्त्योपनीयोगादिजन्यसुखे साक्षात्त्वं देष दर्शनादव्या।
मेरित्याशंक्यापांसुखत्वहमित्यादिप्रत्यक्षसिद्धं सुखत्वादेकमेव लक्षणमित्याद सुखत्वहमित्याद्यन्विति। सुखत्वादीता
दिनानुःखत्वपरिग्रहः यथाश्रुतं तल्लिति। सर्वेषामनुकूलत्वादिकमित्यर्थः। अनुभवेतीति। स्मृतिं संस्कारं च प्रत्यनुभ
वत्वेन कारणतां वदतां प्राचाममयमभिप्रायः तत्तद्विषयकस्मृतिं तादृशं संस्कारं च प्रति तत्तद्विषयकानुभवत्वेनैव
हेतुतानुतत्तद्विषयकज्ञानत्वेनानुभवत्वस्यापि जातित्वेन ज्ञानत्वापेक्षया गौरवान्नावान्तरवृत्तिनिगमनाविर
हः इति शंक्यं व्याप्यधर्मपुरस्कारेण कारणत्वसंभवे व्यापकधर्मस्यान्यथासिद्धिनिरूपकत्वादिति। नवीनाः पुनः ता
द्विषयकस्मृतिं तादृशं संस्कारं च प्रति तत्तद्विषयकज्ञानत्वेनैव हेतुता न त्वनुभवत्वेन संस्कारस्य फलनाश्यतया।
प्रथमस्मरणेनैवानुभवजन्यसंस्कारस्य नाशेन सकृदनुभूतस्य स्मरणोत्तरमस्मरणप्रसंगात् न च स्वजन्यस्मरण ४९
स्य संस्कारनाशकत्वे स्मृतिसाधारणे ज्ञानत्वेन हेतुत्वेपि घटपटादिरूपनानाविषयावगाहिना अनुभवेन जनि

तस्य तावद्विषयकसंस्कारस्य घटाद्येकैकगोचरस्मरणेनापि विनाशान्नानुत्तरं पटादिस्मरणानुपपत्तिः तद्विषयसंस्का
रान्नाशात् स्मृतिजन्यघटादिगोचरसंस्कारस्य च भिन्नविषयतया पटादिस्मारकतायोगात् अतः स्वजन्यचरमस्मृतेरेवाना
श्यत्वात्तद्व्यक्तित्वेन तत्तत्संस्कारनाशकतायाश्चांगीकर्तव्यतया अनुभवत्वेन जनकतायामपि न दोष इति वाच्यं अन्त्य
विषयकस्यैव फलस्य नाशकत्वांगीकारेण दोषात् जायते च पुनः पुनः स्मरणाद्दृढतरः संस्कारः दार्ढ्यं चोत्कर्षरूपो
जातिविशेषो दृढ इति स्मृत्युत्पादप्रयोजकः न च तदेव वक्तुं संपन्नादृढ इति तु उद्बोधकसमवधानादेव तु इति स्मृतिनिय
मोपपत्तौ न तत्प्रयोजकतया संस्कारगतो जातिविशेषः सिध्यतीति वाच्यं दृढ इति स्मृतेर्दैवाधीनत्वादिष्टोद्बोधकस
मवधानाधीनत्वमुपगम्य संस्कारातिशयखंडने शास्त्राद्यभ्यासस्यैवानापत्तेः किं च परित्यज्य च निश्चिताव्यभिचा
रकं रूपं गृह्यमाणव्यभिचारकेण कारणत्वकल्पनं न संभवतीति ज्ञानत्वेन संस्कारहेतुतासंभव इति प्राहुः तन्म नव
तं दर्शयति स्मृतेरपीति। अपिनानुभवपरिग्रहः एतन्मते च जन्यत्वेनानुभवजन्येति स्थाने ज्ञानजन्येति निवेशनी

यं द्रव्यविभाजकोपाधीति। पृथिवीत्वजलत्वादिरूपं यद्द्रव्यविभाजकोपाधिद्वयं प्रत्येकं तत्समानाधिकरणाः द्वित्वद्वि
पृथक्त्वसंयोगादयः तद्वृत्तिजातिमद्गुणत्वमित्यर्थः। रूपादिषु चतुर्षु तादृशं रूपत्वादिकं सांसिद्धिकद्रवत्वे द्र
वत्वत्वावांतरजातिं स्नेहादिषु दशसु स्नेहत्वादिकं भावनायां संस्कारत्वावांतरजातिं चादाय लक्षणसमन्वयः।
नन्विदं लक्षणमेकत्वादिष्वतिव्याप्तं एकत्वत्वादिजातेरपि तादृशत्वात् न च तादृशोपाधिद्वयसमानाधिकरण
वृत्तिगुणत्वन्यूनवृत्तिजातिशून्यगुणत्वमिति तदर्थः। एवं चैकत्वादिषु संख्यात्वादेः सत्त्वात्तादृशजातिशून्यत्वस्यास
त्वे नातिव्याप्तिरिति वाच्यं एवमपि परमाण्वादिष्वतिव्याप्तेः परिमाणत्वादेस्तादृशजातित्वासंभवादिति चेदत्र प्र
वदंत्यभिज्ञाः यद्रूपावच्छिन्नसमानाधिकरणं यत्किंचिद्द्रव्यविभाजकोपाधिद्वयं तद्वृत्तिः क्षितिस्थापकवृ
त्तिभिन्ना च या जातिस्तद्वत्वे सति गुणत्वमिति तदर्थः। यद्रूपावच्छिन्नसामानाधिकरण्यस्य समवायसंबंधघटि ५०
तस्यैव निवेशनीयतया यद्रूपपदेन घटत्वादेर्धर्तुमशक्यत्वाद्घटादावतिव्याप्तिरतो विशेष्यं। क्षितिस्थापकेतिवा

निवारणाय क्षितिस्थापकवृत्तिभिन्नेति। क्षितिस्थापकस्य पृथिव्यादिचतुष्टयवृत्तित्वमतेऽनुदेयं। रूपत्वादेर्यद्रूपप
देन धर्तुमशक्यत्वेप्यवांतरजातीरादाय रूपादिषु लक्षणसमन्वयः। पार्थिवानुष्णाशीतस्पर्शस्यापि वायवीयापे
क्ष्या विजातीयस्यैवानुभवसिद्धत्वात्। संख्यादयस्तु सामान्यगुणा इति न तत्र वैजात्यं जलपृथिव्यादिभेदेन
सिद्धांतसिद्धमतस्तत्र नातिव्याप्तिः। तादृशजातिमद्भिन्नगुणत्वमेव सामान्यगुणानां लक्षणमवसेयमिति।
मूलेकस्य सर्वसंख्याहकत्वाभावादाह अवकेतेति। नीत्यमितीति। अत्र च नित्यत्वं प्रागभावाप्रतियोगित्वं ध्वंसाप्रति
योगित्वं वा। एकतरनिवेशेनापि संयोगादेर्वारणात्। एकपदं स्वरूपकथनमिति द्रष्टव्यं। मूले व्यावर्तका इति नि
त्यद्रव्याणां परस्परभेदसाधका इत्यर्थः। अथ विशेषपदार्थे किं प्रमाणं न चात्यंतसंकीर्णानां परमाणूनां भेदकधर्मं
विना भेदासिद्धिरतः विशेषोंगीकर्तव्य इति वाच्यं एकत्वादिमत्त्वेरेव भेदकत्वसंभवादिति चेन्न यतः एतत्परमा
णोः तत्परमाणुभेदसाधने एकत्वादेर्व्यभिचरिततया एतदेकत्वादेरेव हेतुना वाच्या। अन्यतयोः परमाण्वादेर्भेदा

नित्यावेकत्वादावेतत्त्वं सुग्रहं। एतत्परमाणुसमवेतत्वं हितस्येतत्त्वं तस्मात्तन्नित्यद्रव्यमेष्वो विशेषः पदार्थः स
एव च स्वसजातीयानां परस्परं भेदसाधक इति। तत्रापि विशेषांतरापेक्षा नास्ति अतो नानवस्थेति संप्रदायः। वैशेषि
कमतसाधारण्येन समवायेऽनुमानं प्रमाणमित्यतिनीलयति। समवायिकारणत्वस्यात्वावयविनिमित्तादुच्येति। पर
माणुवारणाय जन्येति। अविनश्यदवस्थमेवापराश्रितमवतिष्ठते विनश्यदवस्थं त्वनाश्रितं क्षणमवतिष्ठते यथा
द्रा ५ तंत्वादिनाशे पटादिरिति मनसिकृत्य मूलेऽविनश्यदवित्युक्तं प्रागभावे प्रमाणमाह जनिष्यतीति। संसर्गेति। तादा
त्म्यातिरिक्तसंसर्गेत्यर्थः ध्वंसप्रागभावयोरपि प्रतियोगितावच्छेदकसंबंधो वर्त्तत इति मताभिप्रायेण त्रैकालिकेति
विशेषणमन्यथाऽन्योन्याभाववारकेणैव तयोर्वारणात्तद्वैयर्थ्यतापत्तेः। यदि संसर्गावच्छिन्नेत्यादेरन्योन्याभावभि
न्नोऽभाव इत्यर्थः। तदा त्रैकालिकेपि सिद्धांतेपि सार्थकं त्रैकालिकत्वमिह नित्यत्वरूपं। मूले भूतले घटो नास्तीति। ५१
अत्र घटाभावांशे भूतलस्य विशेष्यत्वं संबंधः घटाभाववद्भूतलमित्यत्र तु भूतलांशेऽभावस्य विशेषणत्वं संसर्ग

इति वदतां प्राचामभिप्रायः विशेष्यत्वविशेषणत्वे स्वरूपसंबंधविशेषौ न ज्ञानीयविषयताविशेषौ न च विशेषणता
त्वाः स्वरूपसंबंध एक एवास्तु भूतले घटो नास्तीति प्रतीतौ भूतलं घटाभाववदिति प्रतीतौ तौ वैलक्षण्यस्य विशे
षणतावच्छिन्नाधेयताविषयत्वकल्पनेनैव निर्वाहादिति वाच्यं तादृशप्रतीत्योर्वैलक्षण्याय प्रथमायां विशे
षणतावच्छिन्नाधेयता द्वितीयायां विशेषणतासंसर्ग इत्युपेयते किंवा प्रथमायां विशेषणता द्वितीयायां विशे
षणतावच्छिन्नाधारतेत्यत्र विनिगमकस्य दुर्लभत्वात् न च तादृशप्रतीत्योः संसर्गांशेऽविलक्षणत्वेपि विशेष्य
विशेषणभावभेदादेव लक्षण्योपपत्तिरित्यन्यत्र विशेषणताया एव संबंधत्वात्तिति वाच्यं तावतापि भूतले घ
टो नास्ति भूतलवान् घटाभाव इत्यनयोः भूतलं घटाभाववत् घटाभावे भूतलमित्यनयोश्च प्रतीत्योर्वैलक्षण्या
निर्वाहात् तस्माद्विशेष्यत्वविशेषणत्वनामकयोरनयोः स्वरूपसंबंधविशेषयोः संसर्गता तथा च भूतलवान्
घटाभाव इत्यत्र घटाभावांशे भूतलस्य विशेषणत्वं संसर्गो घटाभावे भूतलमित्यत्र च भूतलांशेऽभावस्य विशे

व्यक्तासंसर्गोऽभावस्तेस्वत्वत्वबाधितइति भ्रमत्वनिर्वाह इति संक्षेपः। ध्वंसप्रागभावयोरिवैकप्रतियोगिकयोरत्यं
तान्योन्याभावयोः किमेकविधत्वेनैत्पादप्रतियोगितेति। आरोप्येति प्राचीनमतानिरासायेत्यर्थः। अत्र यथायोग्यं प्रति
योगितावच्छेदकधर्मसंसर्गभेदोऽत्यंताभावबहुत्वप्रयोजकः प्रतियोगितावच्छेदकधर्मभेदोऽन्योन्याभावब
हुत्वप्रयोजक इति द्रष्टव्यं। तदेव दर्शयति केवलेति। केवलदेवदत्ताभावाद्विशिष्टाभावः अतिरिक्त इत्यन्वयः। अन्य
था केवलदेवदत्तवति दंडी नास्तीति प्रत्ययापातापत्तेः। उभयाभावस्यातिरिक्तत्वे प्रतीतिं प्रमाणयति एकसत्त्वेपीति
घटपटौ न स्त इत्यादौ घटत्वं पटत्वमुभयत्वं चैतत्त्रितयं प्रतियोगितावच्छेदकं। केवलघटवति केवलपटवति प
चोभयवति च तथाप्रत्ययात् संबंधभेदेनाभावस्यातिरिक्तत्वं दर्शयति संयोगेनेति। सामान्यविशेषाभावयोर्भे
दं दर्शयति तत्तदिति। अतिरिक्त इति। अन्यथा यत्किंचिद्घटवति घटो नास्तीति प्रत्ययापत्तेः। एवमन्योन्याभावोपी ५२
ति अवच्छेदकभेदात्तत्तद्घटभेदत उभयभेदः घटभेदश्चातिरिक्त इत्यर्थः। प्रसंगाद्व्यधिकरणेति। नांगीक्रियत इ

ति। अभावधियो विशिष्टवैशिष्ट्यावगाहित्वमर्यादोपष्टंभेन तथा घटत्वेन पटो नास्तीत्यादिप्रत्ययस्य विशिष्टवैशिष्ट्यान
वगाहितया घटत्वादेः प्रतियोगितावच्छेदकत्वव्यवस्थापकत्वाभावेन व्यधिकरणधर्मावच्छिन्नाभावे मानाभा
वादिति भावः। ननु तर्हि तादृशाभावस्य यस्य काप्यगतिरित्यत आह पट इति। ननु घटत्वेन पटो नास्तीति प्रतीतेः परा
धिकरणकघटत्वाभावावगाहित्वं न संभवति अमतिबाधके तत्र छद्मोद्भेविप्रतीतेः तत्र छद्मप्रतिपाद्य।
थविषयकत्वपरित्यागायोगात् पटाधिकरणकघटत्वाभावस्य च घटत्वेन पटो नास्तीति वाक्यात्कथमप्य
प्रतीतेः किंतु अवच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशे स्वातंत्र्येण घटत्वावगाहित्वमेव अभावबुद्धि
विशिष्टवैशिष्ट्यावगाहिमर्यादानातिरेक इति नियमस्तेन एवं च व्यधिकरणधर्मावच्छिन्नाभावः सप्रमाण
इति चेद्रक्त तर्ह्यतिरिक्तत्वं तस्येत्याह अतिरिक्तत्व इति। सः। व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः। केव
लान्वयीति। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिरूपविरोधिविरहादिति भावः। ननु भूतलादौ घटसत्त्व

दशायां न तदभावबुद्धिरन्यदा तु जायते । तस्मात् सामयिकाभावोऽतिरिक्त एवांगीकर्तव्य इति वदंतं निराह सामयिके
ति प्रतियोगिविरहसमये प्रतीयमानोऽसंतताभावः एव सामयिकाभावं न तु स्वतंत्रविनाशप्रागभावाभ्यामतिरिक्त इति
समुदितार्थः ननु एवं भूतले घटस्यानयनदशायामपि तदभावस्य नित्यत्वेन सत्वात् अत्यंताभावस्यापत्तिरत आह घटा
भाववती तिनियामकत्वमेव समुपपादयति घटवतीति । तत्तत्कालावच्छिन्नभूतलादेरेव घटाभावसंसर्ग घ.२
तया घटकाले च तत्कालविशिष्टभूतलादिरूपसंसर्गाभावेन तदा न तदत्यंताभावबुद्धिरित्यपि द्रष्टव्यं । नन्वभा
वोऽमास्त्वतिरिक्तः पदार्थः यस्मिन्नधिकरणे घटो नास्तीत्यादिप्रत्ययस्तस्मिन्नधिकरणे घटाद्यभावत्वकल्पनेनैव
तथा प्रतीतिनिर्वाहात् तत्र धर्मिणि धर्मकल्पनायामनंतधर्मिकल्पनातो लघीयस्त्वात् इति गुरुमतमाशं
कते केचनेति । यद्यप्यनंतेष्वधिकरणेषु धर्मकल्पनतोऽतिरिक्तैकधर्मिकल्पनस्यैव लघीयस्त्वात् अत्रोक्त प३
न्यायस्यानवतारः किंचाभावस्याधिकरणस्वरूपत्वे जलादेर्विद्यमानस्य गंधाद्यभावस्य जलादिरूपत्वादित

रेंद्रियग्राह्यतापत्तिरित्यादि दूषणानि प्रस्फुरंतीति तथापि केवलाधिकरणादेवेति तद्वचननिरासादेव तन्निवृत्तिसंभवे
किमेतान्यपेक्षितानीत्यालोच्य तदेव निराकरोति । अभावानंगीकार इति । अतिरिक्ताभावानंगीकार इत्यर्थः ।
अथ किमिदं कैवल्यं भूतलस्वरूपमिति चेत् घटवद्भूतलस्यापि तदभावस्वरूपतापत्त्या तदानीमपि घटाभा
ववत्ताबुद्धिप्रसंगः घटाभाववत्वमिति चेत् सिद्धमतिरिक्ताभावेनातः कैवल्यानिर्वचनमशक्यमित्यादि कैवल्य
ति५ स्यानन्त्याभावस्यातिरिक्तत्वे तद्भावोऽप्यतिरिक्तस्तस्याप्यभावस्तथेत्यनवस्था स्यादत आह अभावाभाव इति
ध्वंसेत्यादि । ध्वंसप्रागभावः प्रतियोगिस्वरूपः तत्प्रागभावस्वरूपश्च प्रागभावध्वंसश्च प्रतियोगिरूप एवेत्यर्थो
वसेयः तेन प्रतियोगिप्रागभावदशायामपि ध्वंसो भविष्यतीति यत्र यस्य प्रतियोगि ध्वंसदशायामपि प्रागभा
वो नेष्टः तस्य चोपपत्तिः ननु काले द्रव्यत्वं नास्तीति प्रत्ययो न जायते द्रव्यत्वाभाव इति तु जायत इति वैलक्षण्य
निर्वाहाय नास्तीति प्रत्यये दैशिकसंबंधावच्छिन्नाधेयत्वाभानं परिकल्पनीयं भिन्नं च घटाभावादभावादेर्घटा

द्विरूपत्वेपि घटाभावो नास्तीति प्रत्युपपत्त्यमप्रमत्वमेव स्यात् तदभावस्य विशेषणताविशेषेणावृत्त्यमंगीकारा
तः अभावाभावोतिरिक्तो न तु भावस्वरूप इति नवीनमतं दर्शयति अभावेति। तद्भिन्नवत्त्वे सत्यत आह तृ
तीयेति। परमकारुणिकेन मुनिना दुःखपंकमग्नं जगदुद्दिधीर्षुणा प्रणीतं प्रमाणप्रमेयेत्यादिसूत्रं तत
द्विरोधं परिहर्तुमाशंकयति नन्विति प्रत्यक्षप्रमाणस्य द्रव्ये अनुमानादीनां च गुणेंतर्भावस्य स्फुटत्वात्
प्रमेयादीनां द्रव्यादिष्वंतर्भावमाह आत्मेत्यादिना। आत्मशरीरेंद्रियाणां द्रव्ये अर्थस्य पृथिव्यादिरूपस्य
द्रव्यादिषु बुद्धेर्गुणे अंतरिंद्रियस्य मनसो द्रव्ये अंतर्भावः। एवमग्रेपि यथायथमंतर्भावो द्रष्टव्यः धर्मा
धर्माविति। तज्जनिके इत्यर्थः। एतच्च स्फुटमाकरे। रागः इच्छा। इच्छाविशेषः मरणमिति। मरणानंतरमाविज
ननमित्यर्थः। तथा च पदस्मृतिः प्रेत्य मृत्वा भावो जननमिति। चरमः प्राणशरीरसंयोगध्वंसो मरणं आ। ५४
यः शरीरप्राणसंयोगाजननं। प्रत्यात्मसंयोगध्वंसवतो घटस्य मुक्तत्वापत्तिवारणाय दुःखध्वंस इति

दुःखध्वंसवतामस्मदादीनामपि मुक्तत्वापत्तिवारणाय कालीनांतं। अन्यदीयदुःखप्रागभावसमानकालि
कदुःखध्वंसवतां शुकाद्यात्मनामपि मुक्तत्वसंगात् स्वसमानाधिकरणेति। दुःखप्रागभावविशेषणं न च समा
नाधिकरणदुःखासमानकालीनत्वं नैवं शुकसमकालिकदुःखध्वंसस्याप्यग्रिमदुःखदूषणत्वेनैव वारणात् प्राग
भावेति व्यर्थमिति वाच्यं यथासन्निवेशे वैयर्थ्याभावादिति दिक्। संशयस्य निरूपितत्वात् प्रयोजनस्वरूपं द
र्शयति प्रयोजनमिति। उभयसाधनवती। उभयसाधनवती। परपक्षनिराकरणस्वपक्षसाधनवती इदं
च वितंडातिव्याप्तिवारणायेति ध्येयं स्वपक्षेति। अत्र विजिगीषुकथेत्यनेवर्तते। नान्येति एकेन पूर्वपक्षः क्रि
यते अन्येन च समाधानमेवं क्रमेण नानाकर्तृकत्ववाक्यसमूहस्यावसेयं। छलमिति। यथा नवकंबलोऽयं
देवदत्त इति। नूतनतात्पर्येण प्रयुक्तस्य नवत्वसंख्याविशिष्टमर्थांतरं परिकल्प्य कश्चिद्दूषयति नास्य कंब
लाः संत्यतिदरिद्रत्वादित्यादि। असदुत्तरमिति। उत्तरस्यासत्त्वं तु स्वव्याघातकत्वं तद्वांतरभेदात्तद्दर्शयति

मे ८

साधर्म्यादिना । दृष्टान्तेऽनुपमानस्य समासतः प्रत्येकं योगः साधर्म्यसमा वैधर्म्यसमेत्यादयश्चतुर्विंशति
जातयः । साधर्म्येणोपस्थापना हेतुदूषकमुत्तरं साधर्म्यसमा यथा आत्मा सक्रियः क्रियाहेतुगुणवत्त्वात् लो
ष्टवत् क्रियाहेतुगुणश्चात्र क्रियाजनकवायुसंयोगादिरेवेति स्थापनायामुत्तरं यदि सक्रियसाधर्म्यात् सा
क्रियस्तदा विभुत्वरूपान्निष्क्रियसाधर्म्यान्निष्क्रिय एव किं न स्यात् न चात्र किंचिद्विनिगमकमस्तीति ।१। वैध
र्म्येण तद्दूषकमुत्तरं वैधर्म्यसमा । यथा तत्रैव क्रियावतो लोष्टस्य साधर्म्याद्यदि क्रियावानात्मा तदा वि
भुत्वरूपतद्वैधर्म्यान्निराक्रिय एव किं न स्यान्न हि तत्साधर्म्यात् क्रियावता भवितव्यं तद्वैधर्म्यान्निष्क्रियेण
न भवितव्यमित्यत्र किंचिन्नियामकमस्तीति ।२। परोक्तसाधनादेव तद्व्यापकधर्मस्य पक्षे आपादनमुत्कर्ष
समा । यथा शब्दोऽनित्यः कृतकत्वाद्घटवदित्युक्ते कश्चिदेवमाह यदि कृतकत्वेन हेतुना शब्दो घटवदनित्यः ५५
स्यात्तर्हि तेनैव हेतुना शब्दो घटवत्सावयवः स्यादिति ।३। परोक्तदृष्टान्तसाधर्म्यात्पक्षे परानभिमतधर्मान्त

रव्यावृत्तसाधनमपकर्षसमा । यथा तस्मिन्नेवानुमाने यदि कृतकत्वेन शब्दो घटवदनित्यः स्यात्तर्हि तेनैवा
शब्दो घटवदश्रावणः स्यादिति ।४। वर्ण्यस्थापनीयस्य दृष्टान्तधर्मस्य पक्षे साधनं वर्ण्यसमा । यथा पूर्वोक्ता
नुमाने क्रियाजनकनोदनाख्यसंयोगवत्त्वाल्लोष्टादेः क्रियावत्त्वं आत्मनस्तु क्रियावत्त्वे तज्जनकनोद
नाख्यसंयोगवत्त्वमपि न स्यादिति ।५। साध्यदृष्टान्तधर्मयोरपि पक्षे तुल्यतासाधनमवर्ण्यसमा । यथा तत्रैवानुमा
ने लोष्टादिगतनोदनादिरूपक्रियाहेतुगुणवत्त्वमात्मन्यसिद्धं तथा च तुल्यतया यथा ऽसिद्धेन क्रियाहेतुगुणे
नात्मनि क्रियावत्त्वं साध्यते तथा तादृशेन क्रियावत्त्वेन तज्जनकगुणवत्त्वमपि किमिति न साध्यते नियाम
काभावादिति ।६। दृष्टान्तविकल्पं प्रदर्श्य दार्ष्टान्तिकविकल्पकथनं विकल्पसमा । यथा तत्रैवानु क्रियाहेतुगुण
युक्तं किंचिद्गुरु यथा लोष्टादि किंचिल्लघु यथा वायुः एवं क्रियाहेतुयुक्तं किंचित् क्रियावत्स्याद्यथा लोष्टा
दि किंचिदक्रियं यथात्मा सर्वविकल्पो न वस्तयं तु न नवतासत्र किं नियामकं स्यादिति ।७। दृष्टान्तस्य प

दउत्पत्ताकथनंसाध्यसमासाध्यत्वाद्दोषः७वपद्धकाचीयथातंत्रेवद्यदियथालोष्टस्तथाआत्मानित्वयोच्यतेत
दायथाआत्मातथालोष्टइत्यापाद्यते।तथाचयथात्मनिक्रियावत्त्वंसाध्यतेतद्धिलोष्टेपितत्साधनीयं।
नेतिचेत्तर्हियथालोष्टस्तथाआत्मेतिनवाच्यंलोष्टसदृशआत्माआत्मसदृशोलोष्टइत्यत्रनियामका।
भावादिति।८।प्राप्त्याप्रत्यवस्थानंप्राप्तिसमाप्राप्तिश्चसाध्यहेत्वोःसामानाधिकरण्यं।यथातंत्रेवक्रियाहे
तुगुणवत्त्वेनेवकिमितिक्रियावत्त्वंसाध्यतेकिमितिक्रियावत्त्वेनतादृशगुणवत्त्वंनउभयोरविशेषादिति
।९।अप्राप्त्याप्रत्यवस्थानमप्राप्तिसमा।यथातंत्रेवहेतुर्वैकदेशाप्राप्तस्यहेतोःसाध्यसाधकत्वंवाच्यंत
थाविशेषात्सर्वःसर्वंसाधयेदितित्रयमेवहेतुःसाध्यचावंकिमितिसाधयेत्साध्यमेवतुसाधयेदित्यत्रप्राप्त
त्व्याप्त्याविनिगमकाभावादिति।१०।साधनपरंपराप्रश्नःप्रसंगसमा।यथाक्रियावत्त्वेक्रियाहेतुगुणवत्त्वंसाध ५८
नंतत्रकिंसाधनंनहिसाधनंविनाकस्यचित्सिद्धिरस्ति।एवंतत्रापिकिंसाधनमित्यादि।११।दृष्टांतांत

६
रेणप्रत्यवस्थानंप्रतिदृष्टांतसमा।यथातंत्रेवलोष्टदृष्टांतेनक्रियावत्त्वेसाधितेनिष्क्रियाकाशदृष्टांतेनआत्म
नोनिष्क्रियत्वमेवकिंनस्यात्।लोष्टदृष्टांतेनक्रियावत्त्वमाकाशदृष्टांतेननिष्क्रियत्वंनेत्यत्रनियामकाभावा
दिति।१२।अनुत्पत्त्याप्रत्यवस्थानमनुत्पत्तिसमा।यथाघटोनित्यःजन्यैकत्वादित्यादौकश्चिदाहयदिजन्यैक
त्वमनित्यत्वेप्रमाणंतदाघटेएकत्वोत्पत्तेःपूर्वंतदभावादनित्यत्वंनित्यत्वंचेत्तदाऽनुत्पन्नएवेति।१३।साधारणध
र्मप्रदर्शनसंशयोद्भावनंसंशयसमा।यथाशब्दोऽनित्यःकार्यत्वादित्यादौशब्दस्यानित्यत्वेनघटेनसहका
र्यत्वरूपंसाधर्म्यंयथास्तितथानित्येनशब्दत्वेनसहश्रावणप्रत्यक्षविषयत्वंसाधर्म्यमस्तीति।उभयसाधर्म्य
दर्शनात्संशयःस्यात्एकपरिशेषेनियामकाभावादिति।१४।वाद्युक्तहेतोःसाध्यविपरीतसाधकहेत्वंतरो
द्भावनंप्रकरणसमासत्प्रतिपक्षोदाहरणमेवात्रोदाहरणंबोध्यं।१५।कालत्रयेपिहेतुत्वासंभवेनाहेतुत्वक
थनमहेतुसमा।यथाकार्यत्वादिरूपसाधनंसाध्यादनित्यत्वात्पूर्वकालवृत्तिचेत्तदानित्यत्वरूपसाध्यस्यत

दानिमनावात्कस्य साधकं । अथ पश्चात्कालवृत्तिस्तदा पूर्वकाले साधनाभावात्कस्य साध्यमनित्यत्वं । यदि चोभयमेक
कालवृत्तिस्तदा किं कस्य साधनं किं कस्य साध्यं विनिगमकाभावादिति । हेतुसमेति पाठे तु कालत्रयेपि हेतुत्वस्यासंभ
वकथनं हेतुसमेत्यर्थो बोध्यः । १६ । अर्थापत्तिपुरस्कारेण साध्याभावोद्भावनं अर्थापत्तिसमा । यथा पूर्वोक्तानुमाने ।
शब्दस्यानित्यसाधर्म्यादनित्यत्वं यदि तदार्थापत्त्या सिद्धं नित्यसाधर्म्यान्नित्यत्वमपि एकतरावधारणे नियामकाभा
वादिति । १७ । सर्वाविशेषप्रसंगोद्भावनमविशेषसमा । यथा तत्रैव पक्षे कृतकत्वादिना ऽनित्यघटादिसाधर्म्येण शब्द
स्यानित्यत्वं तदा प्रमेयत्वादिरूपेण तत्साधर्म्येण सर्वस्यैवानित्यत्वं स्यात् मदुक्तसाधर्म्येण तस्मिन्व्याप्तिरस्त्वित्युक्ते ने
त्यत्र नियामकाभावादिति । १८ । उपपक्षसाधर्म्येण साधनोपपत्तिकथनमुपपत्तिसमा । यथा यदि चानित्यत्वसाधनं
कार्यत्वमुपपद्यत इति शब्दस्यानित्यत्वं तदा नित्यत्वसाधनमपि किंचिदुपपद्यत इति नित्यत्वं किं न स्यादिति । १९ । वा ५७
द्युपदर्शितसाधनाभावेपि साध्यस्योपलब्धिकथनमुपलब्धिसमा । यथा शब्दोऽनित्यः प्रयत्नानुविधायित्वाद्घट

वदित्यत्र प्रयत्नं विनापि वायुनोदनवृक्षशाखाभङ्गजन्यस्य शब्दस्योपलब्धेर्न प्रयत्नानुविधायित्वं शब्दस्येति । २० ।
वादिनाऽनुपलब्धिवशात्कस्यचित्पदार्थस्यानंगीकारेऽनुपलब्धिवशादेव वाद्यभिमतस्यापि यत्किंचित्पदार्थस्याभा
वसाधनमनुपलब्धिसमा । यथा जलादेर्विद्यमानस्याप्यावरणवशादनुपलब्धिः तद्वदुच्चारणात्पूर्वं शब्दस्य विद्य
५८ मानस्याप्यावरणवशादनुपलब्धिरित्येतन्मतं वादिना दूष्यते यद्यावरणवशाच्छब्दो नोपलभ्यते तदा जलाद्यावर
णमिव शब्दाद्यावरणमप्युपलभ्येतेति प्रत्युत्तरं प्राप्य यदि न वादिरेवं नोपेयते तदाऽनुपलब्धेरप्यनुपलब्ध्याऽभा
वेसिद्धे तदभावादावरणाभावासिद्धावावरणसिद्धिरिति धर्मस्य नित्यत्वानित्यत्वविकल्पाद्धर्मिणो नित्यत्वसाधनं नि
त्यसमा । यथा शब्दस्य यदनित्यत्वं न वादिनोच्यते तन्नित्यमनित्यं वा । यदि नित्यं तदा शब्दधर्मेस्तस्य सदातनत्वाच्छब्द
स्यापि तथात्वमागतं । अथानित्यं तदा शब्दे कदाचिदनित्यत्वाभावोक्तेति नित्य एव शब्द इत्युक्तेऽपि यथापि शब्दस्यानित्यत्वमिति
। २२ । अनित्यदृष्टांतसाधर्म्यात्सर्वानित्यत्वप्रसंगोद्भावनमनित्यसमा । यथा यद्यनित्येन घटेन साधर्म्याच्छब्दोऽनित्य इत्युच्य

तेतदायेनकेनचिद्धर्मेणसर्वस्यैवतत्सद्भावात्सर्वस्यानित्यत्वप्रसंगइति॥३३॥ वायुक्तहेतोरन्यकार्येणापिसंभवाभि
धानंकार्यसमः॥ यथातत्रैवप्रयत्नानुविधायित्वमुत्पत्त्यथापिसंभवतिघटादिवच्छब्दस्यरूपोत्पत्तौजलादिवदावरक
निवृत्तौचउपयन्नादिप्रयत्नानुविधानदर्शनात्॥ तथाचशब्दस्यावरणकनिवृत्तिरूपकार्यांतरस्यसंभवान्नानित्यत्वनि
यतत्वमिति॥३४॥ उक्तविकारणसमेतिपाठः॥ तस्यापिकारणस्यप्रयत्नानुविधायित्वस्योपपत्तेःशब्दस्योत्पत्तौतदावरक
निवृत्तौचसमत्वाभिधानमितिदिक्॥ उक्तएवार्थेपर्यवसानमवसेयं॥ अत्रग्रंथगौरवभयात्तत्प्रकारानप्रदर्शि
ताः॥ अनिर्युक्तेरन्यत्रतेऽनुसंधेयाः॥ निग्रहस्थानंलक्षयतिवादिनइति॥ इदंचयद्यपिछलादावप्याप्ततथाप्यर्थां
तरादिरूपनिग्रहस्थानमध्येतत्पाठादहोषःछलत्वादिनापिज्ञानस्योपयोगित्वात्पृथगुपादानं॥ हेत्वाभासवत्तांत
स्यावांतरभेदानुदर्शयतिप्रतिज्ञेत्यादिना॥ तत्रप्रतिज्ञातार्थविरुद्धाभ्युपगमःप्रतिज्ञार्थपरित्यागोवाप्रतिज्ञाहानिः॥ ५८
यथाशब्दोऽनित्यःप्रत्यक्षगुणत्वादित्यत्रसोऽयंगकारइत्यादिप्रत्यभिज्ञाबलात्परेणबाधेउद्भाविते अस्तुतर्हिनित्यइ

हि

त्यत्रसोऽयंगकारएवशब्दइतिनित्यत्वमंगीकुर्वन्वादिशब्दस्यानित्यत्वप्रतिज्ञांजहातीति॥ ८ परोक्तदोषोद्दिधीर्षयापूर्वानु
क्तविशेषणविशिष्टतयाप्रतिज्ञातार्थकथनंप्रतिज्ञांतरं॥ यथानित्यादिरिक्तगुणजन्यकार्यत्वादित्यत्राकाशजन्यत्वेनसिद्धसा
धनोद्भावनेसविषयकेतिगुणविशेषणदानं॥ ९॥ स्वोक्तसाध्यविरुद्धहेतुकथनंप्रतिज्ञाविरोधः॥ यथाद्रव्यंगुणभिन्नं
रूपादितःपृथक्त्वेनानुपलभ्यत्वादिति॥ १०॥ स्वोक्तेऽर्थेपरेणदूषितेतदपलापःप्रतिज्ञासंन्यासः॥ यथाशब्दोऽनित्यऐंद्रि
यकत्वादित्युक्तेपरेणसामान्येव्यभिचारमुद्भाव्यदूषितेस्वोक्तमपलपन्केनोच्यतेशब्दोऽनित्यइति॥ ११॥ परोक्त
दूषणोद्दिधीर्षयापूर्वोक्तहेतौकोऽपिविशेषणांतरोपादानंहेत्वंतरं॥ यथाशब्दोऽनित्यःप्रत्यक्षत्वादित्यत्रसामान्येव्य
भिचारोद्भावनेजातिमत्त्वेसतीतिविशेषणदानं प्रकृतानुपयुक्तार्थकथनमर्थांतरं॥ यथानित्यःशब्दःअस्पर्शवत्त्वादिति
हेतुःहेतुपदंचहिनोतेस्तुनिप्रत्ययेनिष्पन्नंपदंचसुप्तिङंतमित्यादि॥ १३॥ अवाचकशब्दप्रयोगोनिरर्थकं॥ यथा
शब्दोऽनित्यःजबगडदशत्वादित्यादि॥ १४॥ परिषत्प्रतिवादिबोधकप्रयोजकपदप्रयोगःअविज्ञातार्थं॥ तत्रकिंचन्द

यमसिद्धार्थकं त्वरितोच्चारितमित्यादिरूपं॥ परस्परानन्वितार्थकसमूहोऽपार्थकं॥ यथा शङ्खं त्वं घटः पटनित्य
मनित्यं संबध्यमेयत्वादित्यादि॥९॥ अवयवानां व्युत्क्रमेण कथनमप्राप्तकालं॥ यथा शब्दत्वाच्छब्दो नित्य इत्या
दि॥१०॥ यत्किंचिदवयवन्यूनावयवाभिधानं न्यूनं स्यात्॥११॥ अधिकहेत्वादिकथनं अधिकं॥ यथा शब्दो नित्यः
शब्दत्वात् श्रावणत्वाच्चेत्यादि॥१२॥ अनुवादं विना कथितस्य पुनः कथनं पुनरुक्तं॥ यथा शब्दो नित्यः शब्दोऽनित्य
इत्यादि॥१३॥ परिषदा त्रिरभिहितस्याप्यननुवादः अननुभाषणं॥१४॥ परिषदा विज्ञातस्य वादिना त्रिरभिहितस्यापि वा
क्यार्थस्याबोधः अज्ञानं॥१५॥ उत्तरार्हं परोक्तं बुध्वापि उत्तरस्यास्फूर्तिर्विशारदस्याभावः अप्रतिभा॥१६॥ अ
संभवत्कालांतरककार्यव्यासंगमुद्भाव्य कथाविच्छेदो विक्षेपः॥१७॥ स्वपक्षे दोषमनुद्धृत्य परपक्षे दोषाभिधानं
मतानुज्ञा॥१८॥ उद्भावनार्हपरकीयनिग्रहस्थानानुद्भावनं पर्यनुयोज्योपेक्षणं॥१९॥ निग्रहस्थानरहिते निग्रह ५९
स्थानोद्भावनं निरनुयोज्यानुयोगः॥२०॥ एकसिद्धांतमाश्रित्य कथाप्रवृत्तौ तद्विरुद्धसिद्धांतमालंब्योत्तरदानं अ

पसिद्धांतः॥२१॥ प्रतिज्ञाहान्यननुभाषणाज्ञानाप्रतिभाविक्षेपपर्यनुयोज्योपेक्षणानामभावेऽन्येषां हेत्वाभा
सव्यतिरिक्तनिग्रहस्थानानां गुणदोषत्वाभासानां च इत्यादिष्वंतर्भावो यथायथं बोध्यं॥ अतिरिक्तः स्वत्वार्थः सुगम
इत्यभिप्रायेण हृदि षष्ठमिति॥ ननु नलसंयोगे सत्यपि मण्यादिसमवधाने दाहो न जायत इति मण्यादेः प्रतिबंधकता
स्रा वाच्या नवक्केदाहानुकूलशक्तिस्वीकार एव निर्वहति प्रतिबंधकतायाः कार्यानुकूलशक्तिविघटकत्वरूपत्वाद का ४
तस्तदन्यथानुपपत्त्या सिद्धायाः शक्तेरतिरिक्तत्वात् सप्तैव पदार्था इत्यसंगतमिति प्राभाकरः शंकते नन्विति नन्वेवं
शक्तिसिद्धावपि तस्या अतिरिक्तत्वासिद्धिरिति चेन्न यतो न तावद्द्रव्यात्मिका शक्तिः गुणादिष्ववृत्तित्वात् अत एव न गुण
कर्मान्यतररूपः॥ न च सामान्याद्यन्यतमरूपा उत्पत्तिविनाशशालित्वात् एवं चातिरिक्तपदार्थत्वसिद्धिरिति चेन्न प्र
तिबंधकत्वं न कार्यानुकूलशक्तिविघटकत्वं अपि तु कारणीभूताभावप्रतियोगित्वं तच्च मण्यभावस्य हेतुत्वादेवो
पपद्यते मणिसमवधानदशायां च तदभावरूपकारणाभावादेव दाहानुत्पत्तिसंभवात् च अतिरिक्तशक्ति

स्वीकारोऽनुचित इत्याशयेन समाधत्ते प्रतिबंधकाभावस्येति। नन्वदाहोत्पादे वह्निः शक्त इति व्यवहारान्यथानुप
पत्त्या सेऽस्य त्वतिरिक्तशक्तिरित्याशंक्य तस्याः कारणरूपत्वे विव्यवहारोत्पत्तेर्नातिरिक्तशक्तिसिद्धिरित्याह कारण
त्वस्येति नन्वमण्याद्यभावस्य हेतुत्वे मणिसमवधानदशायां सत्युत्तेजके दाहो न स्यात् मन्मते तु मण्याद्यपसरण
दशायामिवोत्तेजकसमवधानदशायामपि वह्नेर्दाहानुकूलशक्त्यंतरोत्पत्त्यंगीकारेण न दोष इति चेन्न उत्तेजका
भावविशिष्टमण्याद्यभावस्य कारणत्वांगीकारेण दोषात् न चोत्तेजकानामननुगततया तत्तदुत्तेजकाभावकू
टविशिष्टमण्याद्यभावस्यैव कारणता पाः कल्पनीयतया गौरवमिति वाच्यं दाहानुकूलशक्तिं प्रत्येतादृशकार
णताया स्तवाप्यावश्यकत्वात् अनंतशक्तितत्प्रागभावतद्ध्वंसकल्पने महागौरवादिति संक्षेपः ननु एवमपि कां
स्यादेरस्पृश्यस्पर्शस्य ध्वंसप्रतिनिमज्जनादिरूपकार्यार्हत्ताशक्तिमत्कांस्यादेरेव तदर्हत्वात् अस्पृश्यस्पर्शसतिशक्ते ६०
र्नाशात् भस्मसंयोगे पुनः शक्तेरुत्पादात् तदर्हता एवं च कांस्यादावाधेयशक्तिरंगीकार्या निच कांस्यादौ निमज्जनादिकं

प्रत्यस्पृश्यस्पर्शस्य प्रतिबंधकत्वकल्पनादिवोपपत्तौ न तदंगीकार इति वाच्यं प्रकृते वा संस्पृश्यस्पर्शस्या संस्पृश्यसंयोगरूपा
तया सति तत्र नाशे प्रतिबंधकाभावसद्भावात् कांस्यादावंतरा भस्मादिसंयोजनं निमज्जनाद्यर्हतापत्तेरिति पुनः प्रत्यवति
ष्ठते नन्विति भस्मादिनेति प्रमेयेणादिपदेनाम्लादिः द्वितीयेन चनाम्नादेः परिग्रहः स्पृश्यध्वंसविशिष्टेनैव कांस्यादेः शुद्धत्वोप
पत्त्या व्यतिरिक्तशक्त्यंगीकारोऽनुचित इति समाधत्ते भस्मादिसंयोगेनेति यत्र कांस्यादौ भस्मादिसंयोगादिध्वंसा
नंतरं पुनरस्पृश्यस्पर्शः तत्रापि भस्मादिसंयोगध्वंसस्य सत्त्वात् शुद्ध्यापत्तिरतः सहितांतं ध्वंसविशेषणं भस्मादित्वं चात्र
संबंधविशेषनियंत्रितं सामानाधिकरण्यं यत्किंचिदस्पृश्यस्पर्शाभावस्य तत्र सत्त्वात् तदापत्तिस्तदवस्थैवेत्यतो या
वदिति तथा च तत्र यावत्तां तत्तदस्पृश्यस्पर्शाभावानां विशेषणतासंबंधेन सत्त्वान्नोक्तदोष इति भावः अत्र
कौधपत्रमस्ति चेत्रस्येदं धनमित्यादौ धनादौ पत्रस्य प्रतीत्यापत्तेः तत्संबंधांतरमिति मतं निरस्यति सत्वमपीति
अपिना उक्तस्य समुच्चायकेन प्रतियोगित्वादिपरिग्रहः ननु तदर्हत्वं किंस्वरूपमित्यत आह यथेति। तदवच्छे

दकं चेत्। तादृशापेक्षत्वप्रयोजकं त्वित्यर्थः। प्रतियोगित्वं प्रतियोगिरूपं प्रतियोगितावच्छेदकरूपं चेत्यादिकं वक्त
व्यमूहनीयं। सर्वेषां पदार्थानामुक्तपदार्थेष्वेव यथायथमंतर्भावं निरूप्य मूलस्य न्यूनतां परिहर्तुं विधिं निरूपयि
तुमाह। चिकीर्षावधानायत्तत्वात्तन्निरूपणं प्रतिजानीते। अथेति। स्वपरमतसाधारणं विधित्वं तावन्निर्वक्ति प्रवृत्तेति
प्रवृत्तिजनिका या चिकीर्षा तज्जनकं यज्ज्ञानं तद्विषय इत्यर्थः। गुरुमते कृतिसाध्यताज्ञानस्य स्वमते च कृतिसाध्य
विशिष्टेष्टसाधनताज्ञानस्य चिकीर्षाद्वारा प्रवृत्तिजनकत्वात्तन्मते कृतिसाध्यत्वे स्वमते च कृतिसाध्येष्टसाध
नत्वे लक्षणसंगतिः। अभिधायकस्य विधित्वमताभिप्रायेणाह तत्त्वमिति। तादृशज्ञानविषयकार्यत्वादिप्रति
पादकलिङादिरित्यर्थः। लिङादीत्यादिनाख्यो दृत्यादिसंग्रहः। नवाकारोऽनास्थायां गुरुमतमाशंकतेऽकृत्यसाध्य इ
ति। अकृत्यसाध्यत्वेनावगत इत्यर्थः। प्रवर्त्तकमिति। चिकीर्षाद्वारा प्रवृत्तिजनकमित्यर्थः। नन्वकृत्यसाध्यत्वज्ञाना
भाव एव प्रवर्त्तकोऽस्त्विति शंक्य कृत्यसाध्यत्वज्ञानाभाववत्त्वेन तत्त्वे गौरवात् कृतिसाध्यताज्ञानकृतिसाध्यनेरत ६१

त्वव्याप्यादिवर्जनानां प्रवृत्तौ प्रतिबंधकत्वकल्पनेन महागौरवाच्चेतिरिक्तान्तु विषभक्षणादौ प्रवृत्त्यापत्तेः। कृतिसाध्यता
ज्ञानस्य तत्रापि सत्त्वादित्याशंकां निराचष्टे नचेत्यादिना। इष्टसाधनतालिंगकेति। अयं मत्कृतिसाध्यः मत्कृतिं विनाऽन्य
नुपपद्यमानत्वे सति इष्टसाधनत्वादित्यानुमानिके इत्यर्थः। काम्यस्थल इति। प्रवर्त्तकत्वादित्यनेनान्वयः। ज्योतिष्टोमया
गादावित्यर्थः। विहितकालेत्यादि। विहितकालजीवित्वज्ञानाधीनस्य कृतिसाध्यताज्ञानस्य नित्ये संध्यावंदनादौ
आशौचादिरूपनिमित्तज्ञानाधीनस्य तस्य नैमित्तिके स्नानादौ प्रवर्त्तकत्वादित्यर्थः। इदमेतत्कालिककृतिसाध्यं संध्या
वंदनं एतत्कालजीवित्वादित्येवं रीत्या कृतिसाध्यत्वज्ञानस्य विहितकालजीवित्वादिज्ञानजन्यत्वम्।
वसेयं। अननुगमगम इति। प्रवृत्तिसामान्यप्रयोजकस्यैकस्याभावादिति भावः। तद्विशेषणघटेत्यादि। स्वं प्रवर्त्त
मानः पुरुषस्तस्य विशेषणं तन्निष्ठो धर्मः कामनादिस्तद्घटितया। स्वविषयसाधनत्वादिरूपस्य तत्संबंधस्य प्रतिसं
धानं ज्ञानं तज्जन्यत्वस्येत्यर्थः। लाघवेनेति कारणतावच्छेदकलाघवेनेत्यर्थः। तन्मते कारणतावच्छेदकस्य जन्यता

रिष्टत्वाद्गौरवमिति॥ नव्याः कृतिसाध्येष्टसाधनतेति॥ अत्र बलवदनिष्टाननुबन्धित्वमप्यंतर्भावनीयं। तेन कृतिसाध्य
त्वेन तृप्तिरूपेष्टसाधनत्वेन चावगते विषसंपृक्तान्नभोजनादौ प्रवृत्त्यापत्तिः। विशिष्टज्ञानतावच्छिन्नस्य कारणत्वकथनं।
तु प्राचां मतेन। नव्यमते कृतिसाध्यत्वादिज्ञानानां पृथगेव दंडचक्रादिन्यायेन कारणत्वात्। प्रयत्नेति। प्रवर्त्तेत्यर्थः।
कृत्यवाप्येति। प्रत्यवायस्य परिहारः प्रागभावः तस्य च दुःखजनकाभावतया तन्नाशस्येवेष्टत्वेन फलत्वमिति भावः।
ननु कथं तत्प्रागभावस्य फलत्वं तस्याजन्यत्वादिति वाच्यं ममास्त्विमस्त्वमिति व्यवहारजन्यस्वरूपसंबंधरूपस्य सं
ध्यावंदनप्रयोज्यत्वस्य तत्र सत्वेन फलत्वात्। तरित्यवधेयं। तदिदं कार्यत्वं एव शक्तिरिति गुरुमतमाशंकते न चि
त्ति। इच्छाविशेषरूपस्य यागस्याशुतरविनाशिनः स्वर्गसाधनत्वेनमानं न संभवति अस्थैर्ययोग्यत्वादित्यपूर्वरूपएव का
र्ये शक्तिरंगीकार्येत्याह यागस्येति। आशुतरविनाशिनः तृतीयक्षणवृत्तिध्वंसप्रतियोगिनः स्वर्गादिफलपर्यंतस्थायि। ६२
अन्वयप्रकारं दर्शयति कार्यं कृतिसाध्यमिति। कार्यबोधेति इदं मत्कृतिसाध्यमिति ज्ञानवानित्यर्थः। विध्यर्थमनुभावि

शेष्यकबोधं दर्शयति तेनेति। तथान्वयेनेत्यर्थः। न्यायमते तु तत्र कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनयागानुकू
लकृतिमान् स्वर्गकाम इति वाक्यार्थबोधः। नन्वपूर्वस्य पूर्वमनुपस्थितत्वात्कथं तत्र शक्तिग्रह इति चेदत्र प्रवदंत्यमिताः।
त्वन्मते तद्धर्मावच्छिन्नविषयकशाब्दबोधं प्रति तद्धर्मावच्छिन्नविषयकशक्तिग्रहस्य तादृशोपस्थितेश्च हेतुतानुपमा
नविषयकत्वेन हेतुहेतुमद्भावः एवं च कार्यत्वावच्छिन्ने यत्र कुत्र चिच्छक्तिग्रहः योग्यतावशाच्चापूर्वरूपकार्यस्य शाब्द
बोधे मानं न हि यागविषयकमन्यत्कार्यं संभवतीति। ननु नित्ये फलाभावात्कथं तत्रापूर्वबोधकत्वे तस्याद्वायाकी
वमिति। अपूर्वमेवेति। कार्यत्वेनेत्यादिः। यद्वापूर्वमित्यर्थः। लौकिकस्थले पूर्वज्ञानासंभवादाह अन्यारोग्येति। क्रियाका
र्य इति। धात्वर्थनिष्ठकार्यत्व इत्यर्थः। लौकिकालौकिकसाधारणेन कार्यत्वावच्छेदेन शक्तिरंगीकार्येत्याशयेन समा
धत्ते यागस्येति। अयोग्यतायागस्य साधनत्वेन मानं संभवतीत्युक्तदोषं निराकरोति योग्यतेति। अयोग्यतासंशयसत्वेपि
तस्याविघटकत्वात् बोधसंभवात् वेदेति। नागवाक्यादिष्टसाधनत्वे यागेऽवगते तस्याशुतरविनाशिनो व्यापारं विनापूर्व

जनकत्वासंभवात् तन्निर्वाहाय पूर्वकल्पितं इत्याह तन्निर्वाहार्थमिति। ननु यागध्वंसस्यैव व्यापारत्वमस्तु किमपूर्वक
ल्पनेनेत्यत आह कीर्तनादिनेति। आदिना कर्मनाशाजलस्पर्शाकरतोयाविलंघनात्। गंडकीबाहुतरणाद्धर्मः क्षर
ति कीर्तनादित्यत्रोक्तकर्मनाशाजलस्पर्शादिपरिग्रहः। ध्वंसस्य व्यापारत्वे स्वर्गधारापत्तिरित्यपि द्रष्टव्यं। विभावनीयं।
लोकव्युत्पत्तीति। लोकव्यवहारेत्यर्थः। स च यो यत्र प्रवर्त्तते स कृतिसाध्यत्वेन च तज्जानातीत्येवंरूपः। केचित्तु यदिष्टया
यत्र प्रवृत्तिस्तत्तत्साधनमिति रूपो लोकव्यवहार इत्याहुः। न व्याप्तिः पुनः लोके पचेतेत्यादिलिङादिसमभिव्याहारस्थ
ले क्रियायामेव कृतिसाध्यत्वविशिष्टेष्टसाधनत्वबोध इति नियमबलादित्यर्थः। सर्वत्रैवेति। शेष इति व्याचख्युः। आख्यात
त्वेनेति। तच्च संकेतसंबंधेनाख्यातपदवत्त्वं। तिङादिकमेव शक्ततावच्छेदकमिति तु नवीनाः। यत्नार्थकत्वं। कृतित्वाव
च्छिन्नवाचकत्वं। किं करोतीति। कृतित्वावच्छिन्नेतितासितसंबंधबोधकं हि तत्प्रश्नवाक्यं उत्तरवाक्यस्य कृतित्वाव ६२
च्छिन्नेपावकसंबंधबोधकत्वं एवं तन्निर्वर्त्तकत्वं नान्यथेति भावः। ननु रथो गच्छतीत्यादि व्याख्यानस्य कृतिबोधा

कत्वासंभवात् इत्युरोधेन व्यापार एव शक्तिर्वक्तव्येत्यत आह ननु रथो गच्छतीत्यादाविति। व्यापारेऽनुकूलत्वोक्तौ तन्न
कुतेन संबंधेन व्यापारे गमनस्यान्वयज्ञानाय। ननु व्याप्तिः पुनः गच्छतीत्यत्राख्यातस्य आनातीतादाविवाश्रयत्वे निरूढलक्ष नि २
णा। न चाश्रयतासंबंधेनैव प्रथमांतार्थे गमनादेरन्वयेन निर्वाहे आश्रयत्वे निरूढलक्षणाकल्पनं निरर्थकमिति वाच्यं
नामार्थयोरिव धात्वर्थनामार्थयोरभेदातिरिक्तसंबंधेनान्वयस्याव्युत्पन्नत्वात् तत्र तथान्वयासंभवात्। लोकं पच
तीत्यादौ लोकादेर्धात्वर्थेन्वयाद्भेदातिरिक्ते ध्येयं। वैयाकरणमतं निराचष्टे देवदत्तइति। नाख्यातार्थत्वमिति। आ
ख्यातस्य कर्तरि शक्तिस्वीकारेऽनंतकृत्यादेः शक्यतावच्छेदकत्वमंगीकर्तव्यं कृत्यादेः शक्तिस्वीकारे तु कृतित्वादिजा
तेः शक्यतावच्छेदकत्वाल्लाघवमिति भावः। तर्हि ते कत्वादीनामेवेति। आख्यातार्थमिति पूर्वेणान्वयः। आदिना कृत्यादि
परिग्रहः। ननु तर्हि कर्तृकर्मणोः कथं लाभ इत्यत आह तयोरेवेति। आक्षेपादेवेति परमतेन। स्वमते तु प्रथमांत
पदेनेत्यर्थः। देवदत्तः तंडुलं पचतीत्यत्र तंडुलकर्मकपाकानुकूलकृतिमान् देवदत्त इत्यन्वयबोधः देवद।

त्तेन पच्यते तंडुल इत्यत्र देवदत्तसमवेतक्रियाजन्यपाककर्मीभूतस्तंडुल इति शाब्दबोधः न च देवदत्तः पचतीत्यत्र तृतीया
तंडुलः पच्यत इत्यत्र च द्वितीया स्यात् कर्तृकर्मणोरनभिधाने तेनानभिधानादिति वाच्यं अनभिहिते कर्तृत्वे तृतीयायाः तादृशो
च कर्मत्वे द्वितीयायाः विधानेनादोषादिति ध्येयं उपसर्गाणां वाचकमतं निरस्यति प्रजयतीत्यादाविति। ननु धातुनै
व प्रकर्षादेर्बोधे प्रशब्दादेर्व्यर्थमत आह उपसर्गाणामिति द्योतकत्वं तात्पर्यग्राहकत्वं एतेन इतरनिपातानां वाचक
त्वमिति सूचितं तथाहि एवकारस्यायोगव्यवच्छेदोऽर्थः शंखः पांडुर एवेत्यादौ अन्ययोगव्यवच्छेदस्य पार्थ एव धनुर्धर
इत्यादावित्यादिकं बहुतरमूहनीयं प्रेत्यावस्थस्येत्यस्य सकलकामनाविषयमुक्तिप्रयोजनकतां ध्येयस्य दर्शयति पदार्थ
ज्ञानस्येति पदार्थतत्त्वज्ञानस्येत्यर्थः अन्येषामवांतरप्रयोजनानामपि सद्भावादाह परमेति श्रुतेरयमर्थः श्रेयस्तु मु
मुक्षुणा आत्मा द्रष्टव्यः मुमुक्षोरात्मदर्शनमिष्टसाधनमिति यावत् आत्मदर्शनोपायं दर्शयति श्रोतव्य इत्यादि तेनार्थक्र ६४
मेणात्मसाक्षात्कारस्य कोऽनवतीति श्रुतिहेत्वनुहोतीयवायूपवनात्यादिवत् असंभावनानिरस्तेरिति अप्रामाण्यशं

ननिवृत्तेरित्यर्थः युक्त्यनुसंधानेति अयं भावः युक्तिभिरनुचिंतनं मननं तच्च आत्मन इतरभिन्नत्वेनानुमानं तच्च भेदप्रति
योगीतरज्ञानसाध्यं तदर्थं सकलपदार्थनिरूपणमिति मोक्षोपयोगित्वं विशदयति तदनंतरमिति मननानंतरमित्यर्थः अ
तस्यार्थस्य नैरंतर्येणानुसंधानरूपनिदिध्यासनस्योपायमाह योगविधिनेति इंद्रियाणि विषयेभ्यः प्रत्याहृत्य इंद्रियेभ्यः
मनः प्रत्याहृत्य साक्षात्कर्तव्ये वस्तुनि मनःप्रणिधानं योगः तदनंतरं निदिध्यासनानंतरं मिथ्याज्ञाननाशे वासनासहि
तमिथ्याज्ञाननाशे दोषाः रागादयः एवकारेण कर्मणो व्यवच्छेदः मिथ्याज्ञानेति शुक्त्यादौ रजतभ्रमो विशेषज्ञानेनैव
यथा निवर्तते तथा प्रकृतेऽपीति भावः केवलं जन्मतेन इत्यादीनामाशयं तेषां कर्माणि तस्मिन् दृष्टे परावरे इत्यादि श्रु
तेः ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुत इत्यादिस्मृतेश्च संग्रह ज्ञानधारेवेति अत्रायं क्रमः निष्कामनया भगवत्प्रीत्य
र्थं कृतैः कर्मभिर्दुरितक्षये पश्चात् पापक्षयाद्विवेको भवति ततो विषयेषु वैराग्यं ततः श्रवणादौ प्रवृत्तिः ततः श्रवणादिक्रमेण
तत्त्वज्ञानोत्पत्तौ पूर्वोक्तमिथ्याज्ञाननाशादिक्रमेण मोक्षनिष्पत्तिः अधिकमस्मदीयायां भिनवर्धितामणिव्याख्यायामनु

संधेयं तर्ककर्कशविचारचातुरीधुरीणैरिति। कौण्डिन्यगोत्रसंभूतो नीलकंठाख्यपंडितः॥ कृतिमापिपदेतस्मै चंद्रचूडाय मंग
लं॥१॥ ॥इति श्रीमत्साल्वोपनामककौंडिन्यवंशपयःपारावारराकाचंद्रायमाणपरवाक्यप्रमाणपारावारीणश्री
रामभट्टतनूजश्रीनीलकंठभट्टविरचितः तर्कसंग्रहदीपिकाप्रकाशः समाप्तः॥ ॥श्रीशुभं भूयात्॥ ॥श्री॥
श्लोकसंख्या १४६५